# मुण्डकोपनिषद्

**ॐ भद्रं कर्णेभिःशृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः ।**
**स्थिरैरङ्गैःस्तुष्टुवांसस्तनुभिः व्यशेम देवहितं यदायुः ॥**
**स्वस्ति न इन्द्रो वृद्धश्रवाःस्वस्ति नः पूषा विश्ववेदाः ।**
**स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥**

अन्वय :

हे देवा । (वयं ) कर्णेभिः भद्रं शृणुयाम, हे यजत्राः, (वयं) अक्षभिः भद्रं पश्येम, (वयं), तुष्टुवांसः(स्तुवन्तः), स्थिरैः अङ्गैः तनुभिः, यत् आयुः, देवहितं व्यशेम(प्रापुयाम)। वृद्धश्रवा इन्द्रः, नः(अस्मभ्यं) स्वस्ति (दधातु), विश्ववेदाः पूषा(सूर्यः), नः(अस्मभ्यं), स्वस्ति(दधातु), तार्क्ष्यः अरिष्टनेमिः(गरुडः), नः(अस्मभ्यं), स्वस्ति(दधातु), बृहस्पतिः, नः(अस्मभ्यं), स्वस्ति (दधातु)।

भद्रम्.....(ad.), (भन्द्-रक्) भन्द्-to make fortunate 1A set
auspicious
कर्णेभिः.....कर्णः (M.)instru.pl. (छान्दसम्), आकर्ण्यते अनेन-इति-कर्ण , कर्ण्--to hear 10U
with the help of ear
शृणुयाम.....शृ 1st per.pl.pot.moodविधि-लिङ्, शृ-to hear 1PP anit (In active voice it goes into 5th conj.) शृ शृवः च। ३.४.११३
may we hear
देवाः..... ....देवः(M.)nom.pl.,(दिव्-अच्) , दिव्-to shine 4p
O, effulgents
पश्येम..... दृश् 1st per.pl.pot.mood विधि-लिङ्, दृश्--to see 1P Anit
may we see
अक्षभिः.....अक्षन् (N.) inst.pl.
with the help of eyes
यजत्राः.....यजत्रः (M.)voc.pl. , यजत्रं त्रायते -इति-यजत्रः
O, protectors of rituals
स्थिरैः.....(ad.) स्थिरः(M.) instr.pl., (स्था-किरच् ) स्था--to stand 1P
with healthy
अङ्गैः.....अङ्गम् (N.)instr.pl., (अङ्ग्--अच् ) अङ्ग्-to go 10P
with limbs
तुष्टुवांसः.....(ad.) तुष्टुवस् (M.)nom.pl., (स्तु-स्तु-कसु ) स्तु-to praise 2P
while praising
तनूभिः.....तनू (F.)instr.pl., (तन्--उ) तन्-to spread 8U
by the bodies
व्यशेम..... वि-विश् 1st .per.pl.po.mood विधि-लिङ्ग (छान्दसम्), वि-विश्-to enter 6P anit
may we enjoy
देवहितम्.....(ad.) देवहितम्(N.)acc.sing., (देवानां हितम्- ष.तत्पु.), (दिव्-अच्) (धा-क्त)
beneficial to the Gods
यत्.....(Re.pro.) यत् (N.)acc.sing.
that
आयुः.....आयुस् (N.)acc.sing., (आ-इ-उस् ) इ-to go 2P
a life

स्वस्ति.....indeclinable
auspicious
नः.....(per.pro.) अस्मद् dat.pl. second form of अस्मभ्यम्, (अस्--मदिक्) अस्- to be 2P set
to us
इन्द्रः.....इन्द्रः(M.) nom.sing., इन्दति इति इन्द्रः, (इन्द्-रन्) इदि-to have great power 1P
one who has a great power
वृद्धश्रवाः.....(ad.) वृद्धश्रवस् (M.)nom.sing., (वृद्धः श्रवसःयस्य सः-ष.ब.व्री.), (वृद्ध्-क्त) (श्रु-असि)
one whose fame is well known
पूषा.....पूषन् (M.)nom.sing., (पूष्--कनिन्) पूष्--to nurture 4Pset
The sun
विश्ववेदाः.....(ad.) विश्ववेदस् (M.)nom.sing., विश्वं सर्वं जानाति वेत्ति -उप.तत्पु.
one who knows everything
तार्क्ष्यः.....तार्क्ष्यः (M.)nom.sing., (तृक्ष-अण्=तार्क्ष-ष्यञ्) तृक्ष्-to go 1P
Garuda
अरिष्टनेमिः..... (ad.) अरिष्टनेमिः(M.)nom.sing., अरिष्यत् अकुण्ठित् गतिः यस्य-ब.व्री.
unobstructed movement
बृहस्पतिः.....बृहस्पतिः (M.) nom.sing., (बृहतः वाचः पतिः)
Guru of the Gods
दधातु.....धा 3rd per.sing. (Imper.mood) लोट्, धा--to grant 3U Anit
may you grant

O Devas! may we hear auspicious words with the ears, O Protectors! of rituals, may we see auspicious through the eyes. May we live with healthy limbs and enjoy the life that is alloted, offering praises to Devas. Indra, whose fame is well known, may bless us. The Sun, who is the nourisher, may protect us. Garuda,who has unobstructed movement and Brhaspati, Guru of Devas, may bless us.

*** ***

**प्रथमः खण्डः**

**ॐ ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता**
**स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह ॥१॥**

अन्वयः

विश्वस्य कर्ता(उत्पादयिता), भुवनस्य गोप्ता(पालयिता), देवानां(द्योतनवतां इन्द्रादीनां मध्ये ), ब्रह्मा(महान्धर्मज्ञानवैराग्यैश्वर्यैः परिवृढः), प्रथमः(गुणैः प्रधानः सन् अग्रे वा) सम्बभूव(स्वातन्त्र्येण अभिव्यक्तः)। सः(ब्रह्मा), सर्वविद्याप्रतिष्ठां(सर्वविद्याभि-व्यक्तिहेतुत्वात्), ब्रह्मविद्यां(परमात्मनः विद्यां), अथर्वाय ज्येठपुत्राय, प्राह(उक्तवान्, अवदत्)।

ब्रह्मा..... ब्रह्मन् (N.)nom.sing., (बृह्-मनिन, नकारस्याकारे ऋतो रत्वम्) बृह्-to expand 1Pset
Bramhaji
देवानाम्..... देवः(M.)gen.pl., (दिव्--अच्) दिव्-to shine 4P set
among the Gods
प्रथमः.....प्रथमः(M.)no.sing., (प्रथ्- अमच्) प्रथ्- to become famous 1A,10Uset
first
सम्बभुव..... सम्-भु 3rd per.sing.perfect past लिट्, सम्-भू-to be born 1P set
manifested
विश्वस्य.....विश्वः (M.)gen.sing., (विविधं प्रत्ययं गम्यम्-विश्वम्) (विश्-व) विश्-to enter 6Panit
of the universe

कर्ता..... कर्तृ (M.)nom.sing., (कृ--तृच्) कृ-to do 8Uanit
the creator
भूवनस्य.....भूवनम् (N.)gen.sing., (भू-क्युन् ) भू- to be 1Pset
of the world
गोप्ता.....गोप्तृ (M.)nom.sing., (गुप्-तृच्) गुप्- to protect 1P vet
the protector
सः.....(demo.pro.) तद् (M.)nom.sing.
He
ब्रह्मविद्याम्.....(ad.) ब्रह्मविद्या (F.) acc.sing., (ब्रह्मणः विद्या-ष.तत्पु.) (विद्-क्यप्-टाप्) विद्-to know 2Pset
knowledge of Bramhan
सर्वविद्याप्रतिष्ठाम्..... (ad.) सर्वविद्याप्रतिष्ठा (F.)acc.sing., (सर्वेषां विद्या-ष.तत्पु.,वा सर्वविद्यायाः प्रतिष्ठा यस्याम्-स.तत्पु.)
(प्रति-स्था-अङ्-टाप्)
the basis of all knowledge
अथर्वाय.....अथर्वन्(M.)dat.sing., (अथ-ऋ-वनिप्)
to Athrva
ज्येष्ठपुत्राय..... (ad.) ज्येष्ठपुत्र(M.)dat.sing.,(ज्येष्ठ च असौ पुत्रः,क.धा.)(यस्मात् पुत् नाम नरकादि पितरं त्रायते- पुत्रः)
(वृध्-क्त-इष्ठन्), (युत्-त्रै-क) वृध्-to be old 1A, 10U, युत्-to share 1P
the eldest son
प्राह.....प्र-ब्रु 3rd per.sing.pre.tense लट्, ब्रु-to tell 2U set "ब्रु" root takes "आह" as an आदेश in the
first five forms in the present tense. आह आहतुः आहु
: : आत्थ आहथु
he tells

Bramhaji, who is the creator and protector of the universe, is great, because of all virtues like dispassion, knowledge, dharma, was the foremost, beause of possessing qualities, or first among effulgent Devas and manifested indepentantly. He imparted the knowledge of Paramatma, which is the base of all knowledge, because of the nature of the cause of manifestation of all knowledge, to the eldest son, Athrva.

**अथर्वणे यां प्रवदेत ब्रह्माथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम् ।**
**स भारद्वाजाय सत्यवहाय प्राह भारद्वाजोऽङ्गिरसे परावराम् ॥२॥**

अन्वयः

ब्रह्मा(विश्वस्य कर्ता, भुवनस्य गोप्ता), यां (ब्रह्मविद्यां), अथर्वणे प्रवदेत(अवदत्, उक्तवान्)। (सः)अथर्वा, तां ब्रह्मविद्यां, पुरा(पूर्वकाले), अङ्गिरे उवाच(उक्तवान्)। सः(अङ्गिरा), (तां ब्रह्मविद्यां), सत्यवहाय(सत्यवहनाम्ने)भारद्वाजाय, (उक्तवान्)। (सः)भारद्वाजः, (तां ब्रह्मविद्यां), अङ्गिरसे(स्वशिष्याय पुत्राय वा), परावरां(गुरोः परात् शिष्येण अवरेण प्राप्तः, एवं परम्परया प्राप्तं) (उक्तवान्)।

अथर्वणे.....अथर्वन् (M.) dat.sing., (अथ-ऋ-वनिप्)
to Athrvan
यां..... (re.pro.) यत्(F.)acc.sing.
that
प्रवदेत.....छान्दसम्,प्रवदत् : प्र-वद् 3rd per.sing.past tense लङ्, प्र-वद्-to speak clearly 1Panit
he taught clearly
ब्रह्मा.....ब्रह्मन् (N.)nom.sing., (बृह्-मनिन् नकारस्याकारे ऋतो रत्वम्) बृह्- to expand 1Pset
Bramhaji

अथर्वा.....अथर्वन् (M.) nom.sing.
Atharva
ताम्.....(rel.pro.) तत् (F.)acc.sing
that
पुरा.....indeclinable, (पुरा--का)
previously
उवाच.....ब्रु 3rd per.sing.per.pastद्वित्व लिट्, ब्रु-to speak 2U set
told
अङ्गिरे.....अङ्गिर् (M.) dat.sing.
to Angira
ब्रह्मविद्याम्.....(ad.) ब्रह्मविद्या (F.)acc.sing., (बृह्-मनिन्) (विद्-क्यन्-टाप्) (ब्रह्मणः विद्या -ष.तत्पु.)
the knowledge of Bramhan
सः.....(demo.pro.) तत् (M.)nom.sing.
he
भारद्वाजाय.....भारद्वाजः (M.)dat.sing., (भरद्वाज-अण्) भरद्वाजस्य अपत्यम्
to Bharadvaj
सत्यवहाय.....(ad.) सत्यवहः (M.)dat.sing., (सत्यं वहति इति सत्यवहः-उप.तत्पु.)
to Satyavaha
प्राह.....प्र-ब्रु 3rd.per.sing.pre.ten.लट्, प्र-ब्रु-to tell 2U set
he tells
अङ्गिरसे.....अङ्गिरस् (M.)dat.sing., (अङ्ग्-अस-इरुट्)
to Angirasa
परावराम्.....(ad.) परावरा(F.) acc.sing., (परा च अवरा च- इत.द्व.)
in succession from higher to the lower ones(lineage)

Bramhaji, the creator and protector of the universe imparted the knowledge to Atharvan. In the early days, Atharva taught that knowledge of Bramhan to Angira. Angira inturn taught Bramha-Vidya to Bhardvaja who is Satyavaha. Bhardvaja handed down that Brahma-Vidya to Angirasa, who is his disciple or son,which had been received through line of teacher to the student.

**शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ ।**
**कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ॥३॥**

अन्वयः

शौनकः ह वै महाशालः(महागृहस्थः आसीत्)। (सः शौनकः), विधिवत्(यथाशास्त्रं), उपसन्नः(उपगतः सन्), अङ्गिरसं (भारद्वाजशिष्यं), पप्रच्छ(पृष्टवान्)। हे भगवः(भगवन्), कस्मिन् न उ विज्ञाते(विशेषण-अवगते सति), सर्वमिदंविज्ञातं (विशेषेण-अवगतं), भवति, इति। (एकस्मिन् विज्ञाते सर्वविज्ञेयं भवति )।

शौनकः.....शौनकः (M.)nom.sing.,(शुनक-अण्) शुनकस्य आपत्यम्
Saunaka
ह,वै.....indeclinable, (हा-ड), (वा-डै)
indeed
महाशालः.....(ad.) महाशालः (M.)nom.sing., (महान् यागशाला यस्य सः-ष.ब.व्री.)
a great house holder

अङ्गिरसम्.....अङ्गिरस (M.)acc.sing., (अङ्ग्-अस-इरुट्)
to Angirasa
विधिवत्.....indeclinable, (वि-धा-कि-वत्) तेन तुल्यं क्रिया चेद्वतिः।५.१.११५
in accordance with the scriptures
उपसन्नः.....(ad.) उपसन्नः(M.) nom.sing., (उप-सद्-क्त)
approached
प्रपच्छ.....पृच्छ् 3rd.per.sing.past perfectलिट्, पृच्छ्--to ask, to seek for 6P anit
asked
कस्मिन्.....(int.pro.) किम्(N.)loc.sing.
which is that
नु.....indeclinable
represented as a doubt
भगवः.....छान्दसम् भगवन्.....भगवान् (M.)voc.sing.,भगः अस्य अस्ति इति तदस्यास्त्यस्मिन्निति मतुप्।५.२.९४
O, Lord !
विज्ञाते..... (ad.) विज्ञातम्(N.)loc.sing., (वि-ज्ञा-क्त) ज्ञा-to know 9Panit
when it having been known
सर्वम्.....(Demo.pro.) सर्वम् (N.)nom.sing.,(सृतं अनेन -)
everything
इदम्.....(demo.pro.) इदम् (N.)nom.sing.
this
विज्ञातम्.....(ad.) विज्ञातम् (N.)nom.sing., (वि-ज्ञा-क्त)
known
भवति.....भू 3rd.per.sing.pre.ten.लट्, भू-to be, to become 1Pset
becomes
इति.....indeclinable, (इ-क्तिन्) इ-to go 2Panit
as represented by quotation mark

Saunaka was a great house holder. He duly, in keeping with scriptures, approached Angirasa, who is the student of Bhradvaja, and asked.O Lord, ("what is That"), which being known, everything becomes known?

**तस्मै स होवाच । द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च ॥४॥**

अन्वयः

सः(अङ्गिरा), तस्मै(शौनकाय), ह उवाच। ब्रह्मविदः(वेदार्थाभिज्ञाः), यत्, " द्वे विद्ये वेदितव्ये " इति, ह, स्म, किल, वदन्ति। (के ते ? इत्याह)। परा(परमात्मविद्या, यया सर्वं विज्ञातं भवतीति)। अपरा च(धर्माधर्मसाधनतत्फलविषया)।

तस्मै.....(demo.pro.) तत् (M.)dat.sing.
to him
सः.....(demo.pro.) तत् (M.)nom.sing.
he
उवाच..... ब्रु 3rd per.sing. Redupl.per.past द्वित्व लिट्, ब्रु-to speak 2U set
told
द्वे.....द्वि (F.)nom.dual (always in dual)
two types

विद्ये.....विद्या (F.)nom.dual, (विद्-क्यप्--टाप्) विद्-to know 2Pset
knowledge
इति.....indeclinable, (इ-क्तिन्) इ-to go 2P
as represented by quotation mark
स्म.....indeclinable
indeed
यत्.....(re.pro.) यत् (N.)acc.sing.
that
ब्रह्मविदः..... ब्रह्मवित् (M.)nom.pl., (ब्रह्म वेत्ति इति-उप.तत्पु.), (बृह्-मनिन्), (विद्-क)
knower of Brahman
वदन्ति.....वद् 3rd.per.pl.pre.ten.लट्, वद्--to tell 1Pset
they tell
परा.....परा (F.)nom.sing., (पॄ-अच्-टाप्) पॄ-to fill up 10Pset
exalted, higher
अपरा.....(ad.) अपरा (F.)nom.sing. (न परा- नञ् तत्पु.)
inferior
एव.....indeclinable, (इ-वन) इ-to go 2Panit
also

To Saunak ,Angira said.Indeed,"Two types of knowledge are to be known," thus say the knowers of Brahman,who are knowers of the meaning of the Vedas.Which are the two? One is para,knowledge of Parmatma because of which everything is understood, and Apara, in which the subject matter is the means of Dharma and Adharma and its result.

**तत्रापरा, ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तंछन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते।५॥**

अन्वयः

तत्र(तस्मिन्), अपरा विषये, ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः, शिक्षा, कल्पः, व्याकरणं, निरुक्तं,छन्दः, ज्योतिषं इति (षडाङ्गानि अपराविद्या उच्यते)। अथ, यया(पराविद्यया), तदक्षरं(यस्मिन् विज्ञाते सर्वं विज्ञातं -तत् ब्रह्म)अधिगम्यते, (सा), परा(विद्या वेदितव्या)।

तत्र.....अव्ययः, (तत्--त्रल्), सप्तम्याः त्रल्।५.३.१०
in that
अपरा.....(ad.) अपरा(F.)nom.sing., (न परा- नञ् तत्पु.)
inferior, lower knowledge
ऋग्वेदः.....ऋग्वेदः (M.)nom.sing., it is in the verse form
Rg veda
यजुर्वेदः.....यजुर्वेदः (M.)nom.sinh., it is in the prose form
Yajus veda
सामवेदः.....सामवेदः (M.)nom.sing., While recitation five nodes of music has been used
Sama veda
अथर्ववेदः.....अथर्ववेदः (M.)nom.sing.
Atharva veda

शिक्षा..... शिक्षा (F.)nom.sing., (शिक्ष्-अ-टाप्) शिक्ष्-to teach 1A set
science of pronunciation
कल्पः.....कल्पः (M.)nom.sing., (क्लृ-अच्- or घञ्) क्लृ-to be able 1Aset
book of rituals and its mandates
निरुक्तम्.....निरुक्तम् (N.) nom.sing., (निर्-वच्-क्तिन्) वच्-to speak 2Panit
etymology of words
छन्दसम्.....छन्दसम् (N.) nom.sing.,(छन्द्- असुन्) छन्द- to please 10Uset
book of different meter
ज्योतिषम्.....ज्योतिषम् (N.) nom.sing., (ज्योतिस्-अच्)
science of Astronomy and astrology
व्याकरणम्.....व्याकरणम् (N.) nom.sing., (व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः येन),(वि-आ-कृ-ल्युट्), कृ-to do 8U
grammatical analysis
अथ.....indeclinable, (अर्थ्-ङ)
now
यया.....(Re.pro.) यत् (F.) instr.sing.
by which
तत्.....(demo.pro.) तत्(N.)nom.sing.
that
अक्षरम्.....(ad.) अक्षरम्( N.)nom.sing., (न क्षरति इति-नञ् तत्पु.), (क्षर्--अच्) क्षर्-to destroy 1Pset
which never subject to distruction
अधिगम्यते.....अधि-गम् 3per.sing.Pass., अधि-गम्- to understand 1P anit
is understood

In that subject matter of "Lower knowledge", constitute the, Rg Veda,Yujus Veda, Sama Veda, Athrva Veda, the six Vedangas- science of pronunciation, book of ritual and it's mandates, etymology of words, book on different meters, science of Astronomy and Astrology and grammatical analysis. Now, 'the Higher knowledge', by knowing which, that Aksara/Brahman is known. This is the knowledge, which is to be understood.

**यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः॥६॥**

अन्वयः

यत्(वस्तु ब्रह्म), अद्रेश्यं(अदृश्यं सर्वज्ञानेन्द्रिय-अगम्यं), अग्राह्यं(कर्मेन्द्रिय अविषयं), अगोत्रं(मूलं कारणं न विद्यते यस्य तत्), अवर्णं(द्रव्यधर्माः स्थूलत्वादयः शुक्लादयः न विद्यमानाः वर्णाः यस्य तत्), अचक्षुःश्रोत्रं(चक्षुःश्रोत्रं न विद्यते यस्य तत्), अपाणिपादं (पाणिपादं न विद्यते यस्य तत्), नित्यं(काल-अबाधितं, अविनाशि), विभुं(विविधप्राणिभेदैः न भवति), सर्वगतं (आकाशवत् व्यापकं), सुसूक्ष्मं(शब्दादिस्थूलत्वादिगुणरहितत्वात्), अव्ययं(न व्येति इति), भूतयोनिं(स्थावरजङ्गमानां कारणभूतं), धीराः, तद् (वस्तु), (यया विद्यया), परिपश्यन्ति(आत्मस्वरुपेण विजानन्ति सा परा विद्या इति अर्थः)।

अद्रेश्यम्.....छान्दसम् अदृश्यम् (ad.) अदृश्यम् (N.)nom.sing., (न दृश्यम्-नञ् तत्पु.), (दृश्- क्यप्), दृश्-to see1P
can not be perceived
अग्राह्यम्.....(ad.) अग्राह्यम् (N.).nom.sing.(न ग्राह्यम्-नञ् तत्पु.), (ग्रह्-क्यप्) ग्रह्- to take 9Pset
can not be grasped
अगोत्रम्.....(ad.) अगोत्रम् (N.).nom.sing. (गोत्रं न विद्यते यस्य तत् नञ् ब.व्री)
which has no source

अवर्णम्.....(ad.) अवर्णम् (N.).nom.sing. (अविद्यमानाः वर्णाः यस्य तत् नञ् ब.व्री)
which has no attributes
अचक्षुःश्रोत्रम्.....(ad.) अचक्षुःश्रोत्रम् (N.).nom.sing., (चक्षुःश्रोत्रं न विद्यते यस्य तत् नञ् ब.व्री)
which has no eyes & ears
अपाणिपादम्.....(ad.) अपाणिपादम् (N.).nom.sing., (पाणिपादं न विद्यते यस्य तत् नञ् ब.व्री)
which has neither feet nor hands
नित्यम्.....नित्यम् (N.) nom.sing., (नि-त्यप्)
not bound by time
विभुम्.....विभुम् (N.)nom.sing.,(वि-भू-डु)(विविधं भवति)
manifested in diverse forms
सर्वगतम्.....(ad.) सर्वगतम् (N.)nom.sing.,(सर्वं च तत् गतं च- सर्वगतम् )KD
all pervasive
सुसूक्ष्मम्.....(ad.) सुसूक्ष्मम् (N.)nom.sing.,(सुष्ठु सूक्ष्मम्- )
extremely subtle
अव्ययम्.....(ad.) अव्ययम् (N.)nom.sing.,(न व्ययम् - नञ् तत्पु.)
imperishable
भूतयोनिम्.....(ad.) भूतयोनिम् (N.)nom.sing., (भूतानाम् योनिम्-ब.व्री.), (यु-नि) यु-to join 2P
source of all beings
परिपश्यन्ति.....परि-दृश् 3rd.per.pl. pre.ten. लट्,परि-दृश्- to see as it is 1PP Anit
they realize
धीराः.....धीरः (M.)nom.pl.,(धी-रा-क)
the wise men

Bramhan, which cannot be percieved by all sense-organs, which is not the object of the organ of action, which does not have a cause(for its existance), which does not have attributes like grossness, whiteness etc., which does not have eyes and ears, which does not have hands and feet, which is not bound by time, being eternal, which assumes all diverse forms, which is all pervading like space, which is extremely subtle being bereft of grossness, starting from sound(which is quality of space) and etc., which does not undergo any change, which is the source of all movable and immovable beings, by which knowledge of that Brahman, the wise men see that Bramhan as nondifferent from themselves, that is Para-vidya.

**यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति ।**
**यथा सतः पुरुषात्केशलोमानि तथाक्षरात्सम्भवतीह विश्वम् ॥७॥**

अन्वयः

यथा(येन प्रकारेण), ऊर्णनाभिः(लूताकीटः, अन्यत्कारणं अनपेक्ष्य, तन्तून्), सृजते(सृजति), (तानेव), गृह्णते(गृह्णाति, स्वस्मिन् उपसंहरति)। यथा(येन प्रकारेण), पृथिव्यां, ओषधयः(वीह्यादिः), (स्वात्मा अव्यतिरिक्ताः एव), सम्भवन्ति(प्रभवन्ति)। यथा(येन प्रकारेण), सतः(जीवतः) पुरुषात्(मनुष्यात्), (अचेतनानि)केशलोमानि, (प्रभवन्ति)। तथा(तद्वत्), अक्षरात् (ब्रह्मणात्), इह(संसारमण्डले), विश्वं (प्रभवति)।

यथा.....indeclinable, (यत्-थाल्) प्रकारवचने थाल्।५.३.२३
just as
ऊर्णनाभिः.....ऊर्णनाभिः (M.) nom.sing.,(ऊर्णं, सूत्रं नाभौ गर्भे यस्य सः- स.ब.व्री.)
a spider
सृजते.....छान्दसम्- सृजति सृज् 3rd.per.sing.pre.ten.लट्, सृज्-to create 6Panit
contextually-to spread out

गृह्णते.....छान्दसम्-गृह्णाते ग्रह्- 3rd.per.sing. pre.ten.लट्, ग्रह्-to take hold of 9Uanit
withdraws
पृथिव्याम्.....पृथिवी (F.) loc.sing., (प्रथ्-षिवन्-सम्प्रसारणम्) प्रथ्-to become famous 1A,10Uset
on the earth
ओषधयः.....ओषधिः (F.)nom.pl.,(उष् - घञ्), (ओष्-धा-कि स्त्रीयां ङीष्) उष्-to burn 1Pset
wide ranging from the blade of grass to the trees, herbs
सम्भवन्ति.....सम्-भू 3rd.per.pl. pre.ten लट्,सम्-भू- to be born 1Pset
manifest
सतः.....(ad.) सत् (N.)abl. sing., (अस्-शतृ) अस्-to be 2Pset
from being,living
पुरुषात्.....पुरुषः (M.) abl. sing., पुरि देहे शेते इति पुरुषः (पुर्-कुषन्) पुर्- to fill 4A,10U
from human being
केशलोमानि.....(ad.) केशलोमन् (N.)nom.pl., (केशाः च लोमानि च- द्वन्द स.), (लु-मनिन्), (क्लिश्-अन्)
hair on the body and head
तथा.....indeclinable, (तत्--थाल्)
so to
अक्षरात्.....(ad.) अक्षरम् (N.)abl. sing.,(न क्षरति-इति नञ् तत्पु.)
out of whom one who is not subject to destruction
इह.....indeclinable,(इदम्-ह इशादेशः)
this
विश्वम्.....(ad.) विश्वम् (N.)nom.sing., (विश्-व) विश्- to enter 6P
the universe

Just as a spider, without expecting other source spreads out its threads and withdraws them also. Similarly on the mother Earth, the herbs sprout without the help of any other source. As insentient hair (on the head & body) grow from the body of the sentient human being, so too, (as though), out of Imperishable Brahman the universe is born.

**तपसा चीयते ब्रह्म ततोऽन्नमभिजायते ।**
**अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतम् ॥८॥**

अन्वयः

ब्रह्म तपसा चीयते। ब्रह्म(अक्षराख्यं), तपसा (सर्वज्ञतया, सृष्टिस्थितिसंहारशक्तिविज्ञानतया), चीयते(बहु स्यां बहु प्रभूतं स्यां भवेयम्)। ततः अन्नं अभिजायते। ततः(ब्रह्मणः), अन्नं(अव्याकृतं ईश्वरोपाधिभूतं), अभिजायते। अन्नात् प्राणः(अभिजायते)। अन्नात्(ईश्वरात्,अव्याकृतात्), प्राणः(हिरण्यगर्भः अभिजायते)। प्राणात्(हिरण्यगर्भात्), मनः(समष्टिसंकल्पविकल्पात्मकं अभिजायते)। मनसः(समष्टिसंकल्पविकल्पात्मकात्), सत्यं(स्थूलभूतपञ्चकं अभिजायते)। सत्यात्(स्थूलभूतपञ्चकात्, लोकाः (भूरादयः सप्तः अभिजायते)। (तेषु लोकेषु मनुष्यादि क्रमेण कर्माणि अभिजायन्ते)। कर्मसु(उक्तकर्मेभ्यः), च अमृतं(कर्मफलं -कर्माणि अवश्यंभावित्वात्-अमृतं अभिजायते)।

तपसा.....तपस् (N.)instr.sing.(इत्थं भूते तृतीया), (तप्-असुन्) तप्-to be powerful 4A
in the form of all knowing power
चीयते.....ची 1st.per.sing. passive, ची- to collect 5U Anit
expands
ब्रह्म.....ब्रह्म (N.)nom.sing., (बृह्-मनिन्) बृह्-to grow 1Pset
Brahman

ततः.....indeclinable, (तत्-तसिल् ) पञ्चम्याः तसिल्।५.३.७
from that
अन्नम्.....अन्नम् (N.)nom.sing., (अद्-क्त) अद्-to eat 2p
food, contextually- unmanifest
अभिजायते.....अभि-जन् 3rd.per.sing.pre.ten.लट्, अभि-जन्-to be born.4A set ज्ञाजनोःजा।७.३.७९ पा.सू.
is being born
अन्नात्.....अन्नम् (N.)nom.abl. (अद्-क्त) अद्-to eat 2panit
contextually- from food, the unmanifest
प्राणः.....प्राणः (M.)nom.sing., (प्र-अन्-घञ्) अन्-to breathe 2P
Hiranya-Grabha
मनः.....मनस् (N.)nom.sing., (मन्-असुन्) मन्-to think 4A
Total Mind
सत्यम्.....(ad.) सत्यम् (N.)nom.sing., (सत्-यत् )
gross five elements
लोकाः.....लोकाः (M.)nom.pl., (लोक्-घञ्) लोक्-to experience 4A
worlds
कर्मसु.....कर्मन् (N.)loc.pl. विषय सप्तमी, (कृ-मनिन्) कृ- to do 8U
with reference to Karmas
अमृतम्.....(ad.) अमृतम् (N.)nom.sing., (न मृतम् - नञ् तत्पु.) (मृ-क्त), मृ-to die 4A
contextually-Result of Karmas

Bramhan becomes many because of omniscient power. From Bramhan, Isvara by the name unmanifest is born. From Isvara, Hianya-Grabha is born. From Hirnya-Garbha the cosmic (total)mind is born. From the cosmic mind, the five gross elements are born.From the five gross elements worlds like Bhu,Bhuvah...etc. are born. In those worlds, human beings and Karmas are born successively. The results(Karmaphala) are born out of those Karmas. And because of the nature of definiteness of the result;the Karmaphala is immortal.(Relatively).

**यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः ।**
**तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते ॥ ९ ॥**

अन्वयः

यः(अक्षराख्यः), सर्वज्ञः(व्यष्टिरुप-अविद्या-उपाधिना, विशेषणरुपेण जानाति इति), सर्ववित्(समष्टिरुपेण मायाख्या-उपाधिना सर्वं जानाति इति)। यस्य(अक्षरस्य), ज्ञानमयं तपः(सार्वज्ञ्यलक्षणं तपः, न तु आयासलक्षणं अस्ति)। तस्मात्(ज्ञानमयात् तपसः), एतद् ब्रह्म(उक्तं हिरण्यगर्भाख्यं), नाम(देवदत्तः-इत्यादि), रूपं(शुक्लं, नीलमित्यादि), अन्नं च(व्रीहियवादि), जायते(अभिव्यज्यते)।

यः.....(re.pro.) यत् (M.)nom.sing.
one who, (from that Brahman-contextually)
सर्वज्ञः.....(ad.) सर्वज्ञः (N.) nom.sing., (सर्वं जानाति इति सर्वज्ञः -उपपद तत्पु.)
one who knows in general (contextually)
सर्ववित्.....(ad.) सर्ववित् (M.)nom.sing.,(सर्वं वेत्ति- सर्ववित् -उपपद तत्पु.)
one who knows in detail
यस्य.....(re.pro.) यत् (M.)gen.sing.
one whose

ज्ञानमयम्.....(ad.) ज्ञानमयम् (N.)nom.sing. (ज्ञा-ल्युट्-मयट्), (मयट्-प्राचुरार्थे) ज्ञा-to know 9Panit
in the form of knowledge
तपः.....तपस् (N.)nom.sing., (तप्-असुन्) तप्-to be powerful 4A
austerity
तस्मात्.....(re.pro.) तत् (N.)abl. sing.
from that
एतद्.....(demo.pro.) एतत् (N.)nom.sing.
this
ब्रह्म.....ब्रह्म (N.) nom.sing.
Brahman
नामरूपम्.....(ad.) नामरुपम् (N.) nom.sing., (नाम च रूपं च-समा.द्वन्द्व), (म्ना-मनिन्), (अभिधीयते अर्थः
अनेन-नाम) म्ना-to learn 1P, (रूप्-क or भावे अच् ), रुप्- to form 10Uset
name and form
अन्नम्.....अन्नम् (N.) nom.sing., (अद्-क्त) अद्—to eat 2Panit
food
जायते.....जन् 3rd.per.sing. pre.ten.लट्, जन्- to be born 4A set
is manifested

From that Bramhan, one who knows everything because of being adjacent to ignorance, at body-mind-sense complex level, and one who knows specifically in detail because of being adjacent of Maya at level of totality, one whose austerity is only in the form of the knowledge, because of that knowledge, this Hiranya-Garbha, is manifested in the name and form such as Devdatta etc., quality such as blue, white etc. and food such as paddy, barley etc..

******

इति मुण्डकोपनिषदि प्रथममुण्डके प्रथमः खण्डः

******

द्वितीय खण्डः

**तदेतत्सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा सन्ततानि। तान्याचरथ नियतं सत्यकामा एष वः पन्थाः सुकृतस्य लोके ॥१॥**

अन्वयः

कवयः(मेधाविनः), यानि कर्माणि(अग्निहोत्रादीनि), मन्त्रेषु (ऋगादिवेदेषु), अपश्यन्, तानि(वेदविहितानि कर्माणि), त्रेतायां (वेदत्रये त्रेतायुगे वा), बहुधा सन्ततानि(विस्तृतानि)। तदेतत् सत्यं(फल-अव्यभिचारि)। (अतः), यूयं, तानि नियतं(वेदविहितानि कर्माणि), आचरथ। सत्यकामाः(कर्मफल- इच्छावन्तः), सुकृतस्य(स्वयंकृतस्य), लोके(फलनिमित्तं लोक्यते, भुज्यते, दृश्यते-लोकं), वः(युष्माकं), एषः पन्थाः(मार्गःअवश्यफलप्राप्तिसाधनम् )।

तत्.....(demo.pro.) तत् (N.)nom.sing.
that
एतद्.....(demo.pro.) एतत् (N.)nom.sing.
this
सत्यम्.....(ad.) सत्यम् (N.)nom.sing., (सत्-यत् )
contextually- the result of Karma
मन्त्रेषु.....मन्त्रः (M.)loc.pl., (मन्त्र्- अच् ) मन्त्र्-to consult 10Aset
in the hymns (of Vedas)

कर्माणि.....कर्मन् (N.)acc.pl., (कृ-मनिन्) कृ-to do 8Uanit
to Karmas
कवयः.....कविः (M.)nom.pl., (कु-इ ) कु-to sound 1Aanit
the wise men
यानि.....(re.pro.) यत् (N.)acc.pl.
those which
अपश्यन्.....दृश्- 3rd.per.pl. pastten.लङ्, दृश्-to see 1P Anit
they saw
तानि.....(re.pro.) त्त् (N.)acc.pl.
those which
त्रेतायाम्.....त्रेता(F.)loc.sing., त्रीन् भेदान् प्राप्नोति...त्रेता
Tretayuga or three Vedic duties
बहुधा.....indeclinable, (बहु-धाच्)
variously
सन्ततानि.....(ad.) सन्ततम् (N.) nom.pl.,(सम्-तन्-क्त) तन्- to spread 8U अनुदात्त..... लोपः झलि-क्ङिति। ६-४-३७
are spread
आचरथ.....आ-चर् 2rd.per.pl. pre.ten. लट्, आ-चर् -to perform 1P Set
you all practice
नियतम्.....(ad.) नियतम् (N.)acc.sing., (नि-यम्-क्त ), यम्-to restrain 1Aanit
for ever
सत्यकामाः.....(ad.) सत्यकामाः (M.)nom.pl. (सत्यः कामः यस्य सः- ष.ब.व्री.)
desire for the true results
एषः.....(demo.pro.) एतत् (M.)nom.sing.
this
वः.....(per.pro.) shorter form of युष्माकम् युष्मद् gen.pl.
for us
पन्थाः.....पथिन् (M.) nom.sing., (पथ आधारे इनि )
a path
सुकृतस्य.....(ad.) सुकृतम् (N.) gen.sing.,(सुष्ठु कृतम्- )
acquired Karma
लोके.....लोकः (M.) loc.sing., (निमित्त सप्तमी), (लोक्यते इति- लोकः), लोकः = कर्मफल
for the result of Karma ( 7th case case is used in sense of 4th.case.)

The wise men saw Karmas like Agnihotra etc. in the Rgveda etc.All those Karmas which are enjoined by Vedas are well spread in all the three vedas or well mentioned in three periods of time like Tretayuga etc. For those who are desirous of the result and perform Karmas, the result of these Karmas are definite. For you, this path is the means for obtaining the result in the world, which is made by oneself .

**यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने ।**
**तदाज्यभागावन्तरेणाहुतीः प्रतिपादयेत् ॥२॥**

अन्वयः

यदा(यस्मिन् काले), हव्यवाहने(अग्नौ), समिद्धे(इन्धनैः सम्यक् प्रज्वलिते), अर्चिः(अग्निशिखा), लेलायते(चलति), तदा(तस्मिन्-काले), आज्यभागौ(आज्यभागस्थानयोः), अन्तरेण(मध्ये), आहुतीः प्रतिपादयेत्(प्रक्षिपेत्)।

यदा.....indeclinable,(यत् काले दाच् )
when
लेलायते.....लेलाय 3rd.per.sing.pre.ten.लट्, लेलाय -नामधातु- to set ableze 1A set ablaze
हि.....indeclinable
indeed
अर्चिः.....अर्चिः (F.)nom.sing., (अर्च्- इन्) अर्च्-to worship 1Pset
a fire
समिद्धे.....(ad.) समिद्धः (M.)loc.sing., (सम्-इन्ध्-क्त) इन्ध्..to shine 7Aset
in well lit
हव्यवाहने.....(ad.) हव्यवाहनः (M.)loc.sing., (हव्यं वहति--उप.तत्पु.)
one who carries away oblations-A fire
तदा.....indeclinable,(तत् काले दाच् )
at that time
आज्यभागौ.....छान्दसम् आज्यभागयोः (ad.) आज्यभागः (M.)loc.dual, (आज्यस्य भागः- ष.तत्पु.)
between two oblations
अन्तरेण.....indeclinable,(अन्तर्-इण-ण)
in between
आहुतीः.....आहुतिः (F.)nom.pl.,(आ-हु-क्तिन् )
oblations
प्रतिपादयेत्.....प्रति-पद् 3rd.per.sing. pot.mood.विधि-लिङ्,प्रति-पद्-- to approach 4A Anit (causal)
one should be made to offer
When the fire is set ablaze properly ,at that time oblations should be made to offer in between the portions.

**यस्याग्निहोत्रमदर्शमपौर्णमासमचातुर्मास्यमनाग्रयणमतिथिवर्जितं च ।**
**अहुतमवैश्वदेवमविधिना हुतमासप्तमांस्तस्य लोकान्हिनस्ति ॥ ३ ॥**

अन्वयः

यस्य(अग्निहोत्रिणः), (यः अग्निहोत्री), अग्निहोत्रं(सायंप्रातः आहुतिरुपं कर्म), अदर्शं(दर्शाख्यकर्म रहितं), अपौर्णमासं (पौर्णमासकर्मरहितं), अचातुर्मास्यं(अचातुर्मास्यकर्मणावर्जितं), अनाग्रयणं(कर्मरहितं), अतिथिवर्जितं(कर्म), अहुतं(अग्निहोत्रकाले न सम्यक् हुतं), अवैश्वदेवं(कर्महीनं), अविधिना हुतं(शास्त्रविधि-अनुसारेण न कृतं), (करोति..), तस्य(अग्निहोत्रिणः), आसप्तमान् (भूः-आदि)लोकान्, हिनस्ति(नाशयति इव आयसमात्रफलत्वात्) ।

यस्य.....(re.pro.) यत् (N.)gen.sing.
of him
अग्निहोत्रम्.....अग्निहोत्रिन् (M.)acc.sing., (यः अग्निहोत्रं करोति सः-)
one who does Agnihotra (fire ritual )
अदर्शम्.....(ad.) अदर्शः (M.) acc.sing., (न दर्शम्-नञ् तत्पु.), (दृश्- घञ् )
without Darsa (दर्शयागः- sacrifice performed following Newmoon fortnight)
अपौर्णमासम्.....अपौर्णमासः (M.) acc.sing. ( न पौर्णमासः ष.ब.व्री.),
without Paurnamasa, (पौर्णमासः- sacrifice performed following Fullmoon fortnight )
अचातुर्मास्यम्.....(ad.) अचातुर्मास्यः (M.)acc.sing., (न चातुर्मास्यम्-नञ् तत्पु.), (चतुर्मास्-ण्य)
without Caturmasya ritual

अनाग्रयणम्.....(ad.) अनाग्रयणः (M.)acc.sing., (न अग्रायणः -नञ् तत्पु.)
Agrayana ritual which is not done(which is to be undertaken in the autumn and spring)
अतिथिवर्जितम्.....(ad.) अतिथिवर्जितः (M.)acc.sing., (अतिथेः वर्जितः -ष.तत्पु.), (अतति गच्छति न तिष्ठति-इति), (अत्-इथिन्), (वृज्-क्त), अत्-to go 1Pset , वृज्-to avoid 2A,7P,10U
guests are not served
अहुतम्.....(ad.) अहुतः (M.)acc.sing.,(न हुतम् -नञ् तत्पु.),(हु-क्त) हु- to offer 3P anit
not offered
अविधिना.....(ad.) अविधिः (M.)inst.sing.,(न विधिः-नञ् तपु.)(वि-धा-कि) धा- to put 3U
not by proper way/not according to rules
आसप्तमान्.....आसप्तमः (M.)acc.pl., (आ-सप्तमः)
including seven
लोकान्.....लोकः (M.) acc.pl.,(लोक्-घञ्)(लोक्यते असौ) लोक्-to experience 1A
worlds (भूः, भुवः, सुवः, महः, जनः, तपः, सत्यम्)
तस्य.....(demo.pro.) तत् (M.) gene.sing.
of that
हिनस्ति.....हिस् 3rd.per.sing. pre.ten. लट्, हिस्--to injure 7P Anit
he destroys

An Angihotri, one whose Angihotra; a ritual, which is offered everyday morning and evening, is performed, without performing Darsa and Paurnamasa, devoid of Caturmasya, bereft of Agrayana, guests not served, not offered at proper time, without the worship of Vaisdeva or not performed properly according to the rules, for such a person the seven worlds are destroyed and the mere fruit is, the trouble undergone.

**काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा ।**
**स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वाः ॥४॥**

अन्वयः

(अग्नेः आहुतिग्रसनार्था एताः), काली, कराली, मनोजवा, सुलोहिता, सुधूम्रवर्णा, स्फुलिङ्गिनी, विश्वरुची च लेलायमानाः(प्रदीप्ताः), सप्त जिह्वाः। देवी विश्वरुच्याः विशेषणम्।

काली.....काली (F.) nom.sing. ,
Kali (black)
कराली.....कराली (F.) nom.sing.
Karali (terrible)
मनोजवा.....मनोजवा (F.) nom.sing.,मनसः इव जवः वेगः यस्याः सा
Manojava (fast)
सुलोहिता.....सुलोहिता(F.) nom.sing.,(सु-रुह्-इतन्-टाप् रस्य लः)
Solohita (very red )
या.....(re.pro.) यत् (F.) nom.sing.
which
सुधूम्रवर्णा.....सुधूम्रवर्णा (F.) nom.sing.,(सु-धूम्र-रा-क )(वर्ण्-घञ्),सुष्ठु धूम्रवर्णा यस्याः सा- सुधूम्रवर्णा )
Sudumravarna (colour of smoke )
स्फुलिङ्गिनी.....स्फुलिङ्गिनी (F.) nom.sing.,(स्फुल्-इङ्गक्-ङीप्)
Sphulingi (emitting sparks)

विश्वरुची.....विश्वरिची (F.) nom.sing.,(विश्-व )(रुच्-कि)
Visvaruci (goes in all directions )
देवी.....देवी (F.) nom.sing. ,(दिव्-अच्-ङीप्)
Devi (effulgent)
लेलायमानाः.....(ad.) लेलायमाना (F.) nom.pl.,(लेला-क्यङ्-शानच् ) pre.act.part. of नामधातु
flaming
सप्तजिह्वाः.....(ad.) सप्तजिह्वा (F.) nom.pl. (सप्त च जिह्वाः च -द्वन्द स.)
Seven tongues

Kali, Karali, Manojava, Sulohita, Sudumravarna, Sphulingini and Visvaruci are the seven flaming tongues of the fire for receiving of oblations. Devi is an adjective of Visvaruci.

**एतेषु यश्चरते भ्राजमानेषुयथाकालं चाहुतयो ह्याददायन् ।**
**तं नयन्त्येताः सूर्यस्य रश्मयो यत्र देवानां पतिरेकोऽधिवासः ॥५॥**

अन्वयः

यथाकालं(सम्यक् कालं, कालं अनतिक्रम्य), यः(अग्निहोत्री), एतेषु भ्राजमानेषु(लेलायमानेषु जिह्वासु), चरते(चरति अग्निहोत्रादिकं कर्म करोति), च आहुतयः हि आददायन्(आददानाः, अग्निहोत्रिणा निर्वर्तिताः)। एताः आददानाः, अग्निहोत्रिणा निर्वर्तिताः आहुतयः), सूर्यस्य रश्मयः(भूत्वा), तं(अग्निहोत्रिं), नयन्ति(आगमयन्ति)।(कुत्र?)। यत्र (यस्मिन्स्थाने), देवानां पतिः(इन्द्रः), एकः अधिवासः(सर्वानुपरि अधि वसति)।

एतेषु.....(demo.pro.) एतद् (M.) loc.pl., (इ-अदि-तुँ क्)
in these
यः.....(rel.pro) यद् (M.)nom.pl., (यज्-अदि ङित्)
who
चरते.....छान्दसम् -चरति चर् 3rd per.sing.Pre.ten.लट्, चर्- to move 1PP set
contextually- performs
भ्राजमानेषु.....(ad.) भ्राजमान(M.)loc.pl.,(भ्राज्-शानच्) pre.act.part. भ्राज्-to shine 1A
in the shining
यथाकालम्.....indeclinable, (कालम् अनतिक्रम्य- अव्य.स.)
at a proper time
आहुतयः.....आहुतिः (F.)nom.pl, (आ-ह्वे-क्तिन्) ह्वे-to invoke 1U Anit
oblations
हि.....indeclinable
indeed
आददायन्.....छान्दसम् आददानाः आददाना (F.)nom.pl., (आ-दा-शानच्)
receiving
तम्.....(demo.pro.) तत् (M.)acc.sing.
to that
नयन्ति.....नी 3rd.per.pl.pre.ten.लट्, नी- to take 1P anit
they take
एताः.....(demo.pro.) एतद् (F.)nom.pl., (इ-अदि-तुँ क्)
these
सूर्यस्य.....सूर्यः (M.)gen.sing., (सृ-क्यप्) सृ- to go 1P Anit
of the Sun

रश्मयः.....रश्मिः (F.)nom.pl., (अश्-मि धातारुट् or रश् -मि) रश्- to sound 1P set
the rays
यत्र.....indeclinable, (यत्-तसिल्)
in which (in built locative meaning)
देवानाम्.....देवः (M.) gen.pl., (दिव्-अच्) दिव्-to shine 4P anit
of the Devatas
पतिः.....पतिः (M.)nom.sing., (पाति रक्षति-) (पा-इति)
the Lord
अधिवासः.....अधिवासः (M.)nom.sing., (अधि-वस्-णिच्-घञ्) वस्-to dwell 1P set
dwells

One who does Anihotra Karma etc., at the proper time in these bright flames, receiveing oblations are accomplished by the Anihotri. These oblations having turned into the rays of the Sun, they lead him to the place where the one Lord of Gods(Indra) dwells, who is incharge of all Gods.

**एह्योहीति तमाहुतयः सुवर्चसःसूर्यस्य रश्मिभिर्यजमानं वहन्ति ।**
**प्रियां वाचमभिवदन्त्योऽर्चयन्त्य एष वः पुण्यः सुकृतो ब्रह्मलोकः ॥६॥**

अन्वयः

सुवर्चसः(दीप्तिमत्यः) आहुतयः, 'एहि एहि(आगच्छ आगच्छ)' इति (उक्त्वा), सूर्यस्य रश्मिभिः, तं यजमानं(अग्निहोत्रं सदृशं कर्मिणं), वहन्ति(स्वर्गं प्रापयन्ति)। अभिवदन्त्यः, अर्चयन्त्यः(दीप्तिमत्यः आहुतयः), 'एषः वः(युष्माकं), पुण्यः सुकृतः ब्रह्मलोकः(प्रकरणात् स्वर्गलोकः)' -(एवं), प्रियां वाचं(उक्त्वा), (तं यजमानं वहन्ति इति शेषः ) ।

एहि.....आ-इ 2nd.per.sing. Imp.mood. लोट्, आ-इ - to come 2Panit
may you come
इति.....indeclinable, (इ-क्तिन्)
used to report the words which are spoken
तम्.....(demo.pro.) तत् (M.)acc.sing.
to that
आहुतयः.....आहुतिः(F.)nom.pl., (आ-ह्वे-क्तिन्) ह्वे-to invoke 1Uanit
oblations
सुवर्चसः.....छान्द.-सुवर्चासिं(ad.) सुवर्चस् (F.) nom.pl.(सुष्ठु वर्चसः यस्याःसा -ब.व्री.)(वर्च्-असुन्)वर्च्-to shine 1A
sparkling, scintillating, brilliant
सूर्यस्य.....सूर्यः (M.)gen.sing., (सृ-क्यप्) सृ- to go 1P Anit
of the Sun
रश्मिभिः.....रश्मिः (F.) instr.sing., (अश्-मि धातारुट् or रश् -मि) रश्- to sound 1P set
along with the rays
यजमानम्.....यजमानः (M.)acc.sing., (यज्- शानच् ) यज्-to sacrifice 1U Anit
to one who does sacrifice
वहन्ति.....वह् 3rd.per.pl. pre.ten. लट्, वह्- to carry 1P set
they carry
प्रियाम्.....प्रिया (F.)acc.sing., (प्री-क-टाप्) प्री-to be satisfied 4A Anit
pleasant
वाचम्.....वाक् (F.)acc.sin., (वच्-क्विप् दीर्घः असम्प्रसारणम्) वच्- to speak 2P Anit
word

अभिवदन्त्यः.....(ad.) अभिवदन्ती (F.)nom.pl., अभि-वद्-शतृ-ङीष् ,वद्-to speak 1P set uttering

अर्चयन्त्यः.....(ad.) अर्चयन्ती (F.)nom.pl., अर्च-णिच्-शतृ-ङीष्, अर्च -to worship 10U set praise

एषः.....(demo.pro.) एतत् (M.)nom.sing., (इ-अदि-तुँ क्)
this

वः.....(per.pro.) short form of युष्माकम्, युष्मद् gen.pl., (युष्-मदिक् ) युष्-to injure 1P set your

पुण्यः.....पुण्यः (M.)nom.sing., (पू-यण्- णुक्, ह्रस्वः) पू-to purify 9U set virtuous

सुकृतः.....(ad.) सुकृतः (M.)nom.sing.,सुष्ठु कृतम् कर्म,(सु-कृ-क्त), कृ-to do 8U Anit well earned

ब्रह्मलोकः.....(ad.) ब्रह्मलोकः (M.) nom.sing., (ब्रह्मणः लोकः- ष.तत्पु.)
contextually-Heaven

Sparkling oblations having said, "come,come", make that sacrificer to reach heaven along with the rays of the Sun. Uttering praise, 'this is your virtouos, well earned heaven", having said pleasing words they make that sacrificer to reach heaven.

**प्लवा ह्येते अदृढा यज्ञरुपा अष्टादशोक्तमवरं येषु कर्म ।**
**एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति ॥७॥**

अन्वयः

यज्ञरुपाः(यैः यज्ञः निर्वत्यते=यज्ञकर्तारः), एते प्लवाः(तृणकाष्टादिभिः निर्मिताः), हि (यस्मात्), अदृढाः(स्वल्प विघ्नेनापि प्रतिहताः), के ते?| (यज्ञरुपाः=यज्ञकर्तारः?), अष्टदशः(षोडश-ऋत्विजः, भार्या, यजमानः), येषु(अष्टदशसु षोडशऋत्विजभार्यायजमानेषु), उक्तं अवरं(अग्निहोत्रादि उपासना वर्जितं कर्म), वर्तते। ये मूढाः एतत् (उपासना रहितं कर्म), श्रेयः(इति मत्वा), अभिनन्दति(हर्षं प्राप्नुवन्ति)। ते(मूढाः), जरामृत्युं(संसारं), पुनः एव अपियन्ति ।

प्लवाः.....प्लवः (M.)nom.pl., (प्लु-अच्) प्लु- to go 1A anit
contextually –flimsy

हि.....indeclinable
because of

अदृढाः.....(ad.) अदृढः (M.)nom.pl., (न दृढः-नञ् तत्पु.), (दृह्- क्त), दृह्-to be fixed or firm 1P set fragile

यज्ञरुपाः.....यज्ञरुपः (M.)nom.pl., (यज्ञः रूप्यते निरूप्यते )(कर्मणि व्युत्पति)
sacrifice accomplished by whom=Accomplishers of sacrifice

अष्टादशः.....अष्टादशः nom.pl.(same in all gender)
eighteen

उक्तम्.....(ad.) उक्तम् (N.)nom.sing., (वच् -क्त ) वच्-to say 2p Anit
has been said

अवरम्.....(ad.) अवरम् (N.)nom.sing. (न वरम् -नञ् तत्पु.), (वृ-कर्मणि अप्), वृ-to select 9A set inferior

येषु.....(rel.pro.) यत् (M.)loc.pl.
on whom

कर्म.....कर्म (N.)nom.sing., (कृ-मनिन् )
Karma
एतत्.....(demo.pro.) एतत् (N.)nom.sing.
this
श्रेयः.....श्रेयः (N.)nom.sing., अतिशये न प्रशस्यम्, (प्र-शंस्-इयसुन्), शंस्- to praise 1PAnit
most exalted
ये.....(rel.pro.) यत् (M.)nom.pl.
those who
अभिनन्दति.....अभि-नन्द् 3rd.per.pl.pre.ten.लट्, अभि-नन्द्- to rejoice 1P set
they get elated
मूढाः.....(ad.) मूढः( M.)nom.sing., (मुह्-क्त) मुह्-to err 4P vet
deluded,ignorant people
जरामृत्यम्.....छान्दसम् -जरामृत्यू (ad.) जरामृत्युः (N.)acc.sing.
जरा च मृत्युः च -जरामृत्यू (इत.द्वन्द) (जृ-अङ्-टाप्)(मृ-त्युक्)
old age and death
ते.....(rel.pro.) तत् (M.)nom.pl.
those
पुनर्.....indeclinable, (पन्-अर्-उत्वम्)
again
एव.....indeclinable
indeed
अपियन्ति.....अपि-इ 3rd.per.pl.pre.ten. लट्, अपि-इ-to gain 2P Anit
they get

Constituents of a sacrifice are flimsy and fragile, because even by slightest obstacle they are destroyed(interrupted). Who are those? A Karma which is devoid of *upasana*, is inferior has been said to rest with reference to sixteen priests, sacrificer and his wife. These deluded people having thought that, this karma is good, they got elated. Such people experience old age and death repeatedly.

**अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः ।**
**जङ्घन्यमानाः परियन्ति मूढाःअन्धेनैव नीयमाना यथान्धाः ॥८॥**

अन्वयः

अविद्यायां अन्तरे(मध्ये), वर्तमानाः(अविवेकप्रायाः), स्वयं(वयं एव), धीराः पण्डितं मन्यमानाः(विदितं आत्मानं सम्भावयन्तः)। मूढाः(विवेकशून्याः), जङ्घन्यमानाः(जरा-रोगादि अनेक-अनर्थ-व्रातैः हन्यमानाः), परियन्ति(विभ्रमन्ति-संसारचक्रे पुनः पुनः विभ्रमन्ति)। यथा, अन्धाः(नेत्रहीनाः पुरुषाः), अन्धेन एव नीयमानाः(प्रदर्श्यमानमार्गाः प्राप्यमाणाः, लोके, अन्धाः, गर्तकण्टकादौ पतन्ति, तथा मूढाः जन्ममरणादिदुःखम् प्राप्नुवन्ति)।

अविद्यायाम्.....(ad.) अविद्या (F.)loc.sing., (न विद्या-नञ् तत्पु.) (विद्-क्यप्), विद्-to know 2P Set
in ignorance
अन्तरे.....(ad.) अन्तरः (M.)loc.sing., अन्तं राति ददाति, रा-क
being inside, being in the midst of
वर्तमानाः.....(ad.) वर्तमानः (M.)nom.pl., (वर्त्-मुक्-शानच् ), वर्त्-to be 1A Set
remaining

स्वयम्.....indeclinable, (सु-अय्-अम्)
oneself
धीराः.....धीरः (M.)nom.pl., (धी-रा-क )
wise-men
पण्डितम्.....पण्डितः (M.)acc.pl., (पण्डा अस्य अस्ति-पण्डितः), (पण्डा-इतच्)
the learned
मन्यमानाः.....(ad.) मन्यमानाः(M.)nom.pl., (मन्-यक्-मुक्-शानच्) मन्-to think 4A anit
being thought of
जङ्घन्यमानाः.....(ad.) जङ्घन्यमानः (M.) nom.pl., (हन्-यङ्-यक्-शानच् ) freq.- 'यङ्', हन्-to kill 2P anit
being buffeted
परियन्ति.....परि-इ 3rd.per.pl. pre.ten.लट्, परि-इ-to go round 2P Anit
go round
मूढाः.....(ad.) मूढः(M.)nom.pl., (मुह्-क्त ) मुह्-to be deluded 4P anit
fools, deluded
अन्धेन.....अन्धः (M.)instr.sing., (अन्ध्-अच्) अन्ध्-to be blind 10U set
by the blind
नीयमानाः.....(ad.) नीयमानः (M.)nom.pl., (नी-यक्-मुक्-शानच्) नी-to lead 1P anit
being led
यथा.....indeclinable, (यत्-त्राल्)
just as
अन्धाः.....अन्धः (M.)nom.pl., (अन्ध्-अच्) अन्ध्-to be blind 10U set
blind people

Remaining within the fold of ignorance and thinking, "We are by ourselves wise and learned", such fools being buffeted by diseases, old age etc., go round in the cycle of birth and death, just as the blind men, being led by the blind fall down in the ditch.

**अविद्यायां बहुधा वर्तमानाःवयं कृतार्था इत्यभिमन्यन्ति बालाः।**
**यत्कर्मिणो न प्रवेदयन्ति रागात्तेनातुराः क्षीणलोकाश्च्यवन्ते ॥९॥**

अन्वयः

अविद्यायां, बहुधा बालाः(अज्ञानिनः) वर्तमानाः, 'वयं एव कृतार्थाः(कृतकृत्याः)', इतिअभिमन्यन्ति(अभिमानं कुर्वन्ति)। रागात्(कर्मफलापेक्षात्), कर्मिणः यत्(आत्मतत्त्वं), न प्रवेदयन्ति(जानन्ति)। तेन(आत्मतत्त्व-अज्ञानेन), आतुराः(दुःखिनः) क्षीणलोकाः(क्षीण-कर्मफलाः), (स्वर्गलोकात्), च्यवन्ते ।

अविद्यायाम्.....(ad.) अविद्या(F.)loc.sing.
in ignorance
बहुधा.....indeclinable, (बहु-धाच्), सङ्ख्याया विधार्थे धा।५.३.४२
diversely
वर्तमानाः.....(ad.) वर्तमानः (M.)nom.pl., (वर्त्-मुक्-शानच् ) वर्त्-to be 1A Set
remaining
वयम्.....(per.pro.) अस्मद् Nom.pl., (अस्-मदिक्)
we
कृतार्थाः.....(ad.) कृतार्थः (M.)nom.pl., ( कृतम् अर्थः येन-तृ.ब.व्री.)
one who has attained the goal

अभिमन्यन्ति.....अभि-मन् 3rd per.pl. pre.ten. लट्, अभ्-मन्- to consider 4Panit
consider
बालाः.....बालः (M.)nom.pl.,(बल्-ण, बाल्-अण्)
contextually- ignorant people
यत्.....(rel.pro.) यद् (N.)nom.sing., (यज्-अदि डित्)
which
कर्मिणः..... कर्मिन् (M.)nom.pl., (कृ-मनिन्)
one who does Karma
प्रवेदयन्ति.....प्र-विद् 3rd.per.pl. pre.ten.लट्, प्र-विद्- to know 10A set
they know
रागात्.....रागः (M.)abl.sing (हेतौ पञ्चमी), (रञ्- घञ्) रञ्-to be pleased 1U Anit
because of attachment
तेन.....(demo.pro.) तत् (N.)nom.sing.,(तत् इति परोक्षे विजानीयात्)
by that
आतुराः..... आतुरः (M.)nom.pl., (इषदर्थे आ-अत्-उरच्) अत्-to go 1P set
afflicted
क्षीणलोकाः.....(ad.) क्षीणलोकः (M.)nom.pl.,क्षीणः लोकः(पुण्यः) येषां ते- ब.व्री.(क्षि-क्त दीर्घः),
exhaustion of the results of Karma(punya)
च्यवन्ते..... ....च्यु 3rd.per.pl. pre.ten. लट्,च्यु- to drop down 1A Anit
they come down

Continuing diversely in the midst of ignorance, ignorant people consider, "we have attained the goal". Men who do Karma, because of being under the influence of attachment, they do not know 'Atma'. Because of this reason, they are afflicted by sorrow and are deprived of heaven, with the exhaustion of the results of Karma.

**इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः ।**
**नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वेमं लोकं हीनतरं वा विशन्ति ॥१०॥**

अन्वयः

इष्टापूर्तं(इष्टं-यागादिवैदिक कर्म, पूर्त-वापिकूपतडागादि स्मार्त कर्म), एव वरिष्ठं(उत्तमं), (इति), मन्यमानाः(चिन्तयन्तः)। प्रमूढाः(अज्ञानेन मत्तः), (इष्टापूर्तात् कर्मणः), अन्यत्(आत्मज्ञानाख्यं)श्रेयः, न वेदयन्ते(जानन्ति)। ते(प्रमूढाः), नाकस्य(स्वर्गस्य), पृष्ठे(उपरिभागे) सुकृते(पुण्यकर्मफलभूते),अनुभूत्वा(अनुभूय), इमं लोकं(पृथ्वीलोकं), वा हीनतरं(तिर्यङ्नरकादि निकृष्टं लोकं) यथाकर्मशेषं), विशन्ति(प्राप्नुवन्ति)।

इष्टापूर्तम्.....(ad.) इष्टापूर्तम् (N.)acc.sing., (इष्टं च पूर्तं च -इ.द्वन्द)
(यज्-क्त), (पूर्-क्त) यज्-to do ritual 1A , पूर्-to fill 3Pset, 9P set
rites enjoined by Vedas and *Smṛtis*
मन्यमानाः.....(ad.) मन्यमानाः (M.)nom.pl., (मन्-यक्-मुक्-शानच्) मन्- to think 4A Anit
being thought
वरिष्ठम्.....(ad.) वरिष्ठम् (N.)acc.sing., एषः अयं अतिशयेन वरः- उरु, (उरु-इष्ठन् वरादेशः)
the highest
न.....indeclinable, (नह् वा नश्-ड्)
not

अन्यत्.....(ad.) अन्यत् (N.)acc.sing.
other
श्रेयः.....(ad.) श्रेयस् (N.)acc.sing., (अतिशयेन प्रशस्य-इयसुन् आदेशः) प्रशस्यस्य श्रः।५.३.६०पा.सू.
better
वेदयन्ते.....विद् 3rd.per.pl. pre.ten. लट्, विद्- to know 10A set
they understand
प्रमूढाः.....(ad.) प्रमूढः (M.)nom.pl.,(प्र-मुह्-क्त) ,मुह्-to be deluded 4PAnit
highly deluded
नाकस्य.....नाकः (M.) gen.sing., न कम्-अकम्,दुःखम्, तत् नास्ति अत्र इति -नाकः
of the heaven
पृष्ठे.....पृष्ठम् (N.)loc.sing., (पृष् स्पृष् वा थक् नि.साधु)
on the upper side
ते.....(demo.pro.) तत् (M.)nom.pl.
those
सुकृते.....(ad.) सुकृतम् (N.)loc.sing., (सुष्ठु कृतम्- सुकृतम्)
contextually result of good action
अनुभूत्वा.....छान्दसम् -अनुभूय, (अनु-भू-त्वा), (अनु-भू-ल्यप्) ind.past participle
having experienced
इमम्.....(demo.pro.) इदम् (M.)acc.sing., (इन्द्-कनिन्) इन्द्-to have a great power1P
to this
लोकम्.....लोकः (M.) acc.sing., (लोक्यते असौ- लोकः), (लोक्-घञ्) लोक्-to perceive 1Aanit
the world
हीनतरम्.....(ad.) हीनतरः (M.)acc.sing., (हीन्-तरप्)
inferior
वा.....indeclinable, (वा-क्विप्)
or
विशन्ति..... विश् 3rd per.pl. pre.ten. लट्, विश्- to enter,to get 6P Anit
they get

Many who consider a Karma which is prescribed by Veda and Smrtis like rituals, building of well and tanks to be the highest. These deluded fools do not know other than this Karma, which is the most exalted.
Those fools, having experienced the fruits of good actions, on the heights of the heaven, enter this world or an inferior one; in accordance with the residual results of Karma.

**तपःश्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्ष्यचर्यां चरन्तः ।**
**सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मा ॥११॥**

अन्वयः

ये, शान्ताः(उपरत-इन्द्रियकरणग्रामाः), विद्वांसः(ज्ञानप्रधानाः गृहस्थाः च), भैक्ष्यचर्यां चरन्तः(भिक्षार्थं गृहेषु रटन्तः, वानप्रस्थाः सन्यासिनः), अरण्ये, तपःश्रद्धे(तपः-स्वाश्रमविहितकर्म, श्रद्धा-हिरण्यगर्भादि-उपासनं), हि(एव), उपवसन्ति(सेवन्ते)। यत्र(यस्मिन् स्थाने), सः पुरुषः(हिरण्यगर्भः), अमृतः(आपेक्षिकः), अव्ययात्मा(यावत् संसारस्थायी), वर्तते।(तत्र), ते(शान्ता, विद्वांसो, भैक्ष्यचर्यां चरन्तः, जनाः), सूर्यद्वारेण(उत्तरायणमार्गेण), प्रयान्ति(प्राप्नुवन्ति)।

तपःश्रद्धे.....(ad.) तपःश्रद्धा (F.)acc.dual, (तपः च श्रद्धा च-इत.द्वं.), (तप्-असुन्), (श्रत्-धा-अङ्-टाप्)
to the ones own duty and *upasana* like *Hiranyagarbha*
ये.....(re.pro) यत् (M.)nom.pl.(यज्-अदि ङित्)
those who
हि.....indeclinable
indeed
उपवसन्ति.....उप्-वस् 3rd.per.pl. pre.ten. लट्, उप्-वस्- to dwell 1P set
they dwell
अरण्ये.....अरण्यम् (N.) loc.sing., अर्यते गम्यते शेषे वयसि-, (ऋ-अन्य)
in the forest
शान्ताः.....(ad.) शान्तः(M.)nom.pl., (शम्-क्त) शम्-to grow calm 4P set
satisfied persons
विद्वांसः.....विद्वस् (M.)nom.pl., (विद्-क्वसु) विद्-to know 2P set
learned men
भैक्ष्यचर्याम्.....(ad.) भैक्ष्यचर्या (F.)acc.sing., (भिक्षा-श्यञ्- भैक्ष्यम्, भिक्षार्थं चरणम्-भैक्ष्यचर्या)
given to alms
चरन्तः.....(ad.) चरन् (M.)nom.pl., (चर्- शतृ) चर्- to move 1P set
while moving
सूर्यद्वारेण.....(ad.) सूर्यद्वारः (M.) intru.sing., (सूर्यस्य द्वारम्-ष.तत्पु.)
by the path of the sun
ते.....(re.pro.) तत् (M.) nom.pl.
those
विरजाः.....छान्द.-विरजसः, (ad.) विरजस् (N.)nom.pl., विगतानि रजांसि यस्य सः- प्रादि तत्पु.
freed from impurities
प्रयान्ति.....प्र-या 3rd.per.sing.pre.ten. लट्, प्र-या- to go 2P anit
go
यत्र.....indeclinable, (यत्-त्रल्) inbuilt locative sense
in which
अमृतः.....(ad.) अमृतः (M.)nom.sing.,(न मृतः-नञ् तत्पु.)
immortal
सः.....(demo.pro.) तत् (M.) nom.sing.
he
पुरुषः.....पुरुषः (M.) nom.sing., (पुरि देहे शेते,शी-ड पृषो.),(पुर्-कुषन्) पुर्-to fill 4A set
a person
हि.....indeclinable
indeed
अव्ययात्मा.....(ad.) अव्ययात्मन् (M.)nom.sing., (न व्येति इति अव्ययः, अव्ययः आत्मा यस्य सः-ब.व्री.)
does not go under any change

Those who live in the forest, self-controlled, whose sense organs are under control, learned persons who are meditators and house holders, while moving for alms, are *Vanprasthas* and *Sannyasins*. They resort to Karma according to ones own Ashrama and do *upasana* like *Hiranyagarbha* and others. They becoming free from impurities, will travel by the bright path of the Sun to where that *Purusha is*, by the name *Hiranyagarbha* who is relatively immortal and who dose not undergo change for one world cycle .

**परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन ।**
**तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥१२ ॥**

अन्वयः

ब्राह्मणः(अधिकारी पुरुषः), निर्वेदं(वैराग्यं), आयात्(कुर्यात्)। (किं कारणात् वैराग्यं आयात्?)। कर्मचितान् (अविद्याकामदोष-प्रवर्तितकर्मणा संपादितान्), लोकान्(दक्षिणोत्तरमार्गलक्षणान् कर्मभूतान्), परीक्ष्य(शास्त्रानुमानाभ्यां अनित्यत्वेन विचिन्त्य, निर्वेदं आयात्)। (कीदृशं वैराग्यम्?-इति उच्यते), (इह संसारे), कृतेन(कार्यभूतेनकर्मणा), अकृतः(नित्यः मोक्षः), न, अस्ति। (अथ), तत्(अकृतं मोक्षस्वरुपं), विज्ञानार्थं, सः(निर्वेदः पुरुषः), समित्पाणिः(सन् विधिवत्), श्रोत्रियं (अध्ययनश्रुत-अर्थसंपन्नं), ब्रह्मनिष्ठं(सर्वकर्माणि हित्वा, केवले अद्वयेब्रह्मणि निष्ठा यस्य), गुरुं(दयादिसम्पन्नं), अभिगच्छेत्।

परीक्ष्य.....ind. past participle, (परि-ईक्ष्-ल्यप्), ईक्ष्-to see 1A set
having analysed

लोकान्.....लोकः (M.)acc.pl., (लोक्यते अनेन-लोकः), लोक्-to perceive 1A set
worlds

कर्मचितान्.....(ad.) कर्मचितः(M.)acc.pl., (कर्मणा चितः-तृ.तत्पु.)
acquired by Karmas

ब्राह्मणः..... (ad.) ब्राह्मणः (M.)nom.sing., (ब्रह्म वेदं शुद्धं चैतन्यं वा वेत्ति, अधिते वा- अण्)
*Brahmana*

निर्वेदम्.....(ad.) निर्वेदम् (N.)acc.sing., (निश्चयेन वेदनम्- वैराग्यम्)
dispassion

आयात्.....आ-या 3rd.per.sing.pot.mood.विधिलिङ्,आ-या-to arrive 2P anit
one should arrive to

न.....indeclinable, (नह् वा नश्-ड्)
not

अस्ति.....अस् 3rd.per.sing. pre.ten. लट्,अस्- to be 2P set
is

अकृतः.....(ad.) अकृतः (M.)nom.sing., (न कृतः-नञ् तत्पु.), (कृ-क्त), कृ-to do 8U anit
*Moksa*

कृतेन.....(ad.) अकृतः (M.)instu.sing., (कृ-क्त) कृ-to do 8U anit
by Karma (contextual)

तत्.....(demo.pro.) तत् (N.)acc.sing.
that

विज्ञानार्थम्.....(ad.) विज्ञानार्थम् (N.)acc.sing., (विज्ञानाय इदम् अर्थम्)
for knowing

सः.....(demo.pro.) तत्: (M.)nom.sing.
he

गुरुम्.....(ad.) गुरुः (M.)acc.sing., ( ग-कु-उच्च उणा.सू. 1.24)
to the teacher

अभिगच्छेत्.....अभि-गम् 3rd.per.sing.pot.mood विधि-लिङ्, अभि-गम्- to approach 1P anit
one should approach

समित्पाणिः.....(ad.) समित्पाणिः (M.)nom.sing., (समिधः पाणौ यस्य सः-व्यधि.ब.व्री.)
one who has sacrificial faggots in hand

श्रोत्रियः.....(ad.) श्रोत्रियः (M.)nom.sing., (छन्दः वेदम् अधिते वेत्ति वा-छन्दस्-ध, श्रोत्रादेशः)
well versed in Vedas
ब्रह्मनिष्ठम्.....(ad.) ब्रह्मनिष्ठः (M.)nom.sing., (ब्रह्मणि निष्ठा यस्य सः-स.ब.व्री.)
one who is absorbed in Brahman

A Brahmana arrives at dispassion. For which reason does he resort to dispassion? Having examined through *Sastra* and experiencing that the results of the *Karmas* characterised by Northern and Southern paths are accomplished through ignorance, desire and actions becomes dispassionate. Maxim: "In this world, *nitya moksa* is not through result of *Karma*." Therefore, in order to know that 'Moksa', he should approach properly with sacrificial faggots, to the teacher, who is *śrotriya*, well versed in the meaning of the *Vedas* that he recites and hears, one who has given up all Karmas, and whose committment is only with reference to the nondual Brahman and one who is endowed with qualities like compassion etc.

**तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय ।**
**येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्वतो ब्रह्मविद्याम् ॥१३॥**

अन्वयः

सः विद्वान्(श्रोत्रियः ब्रह्मनिष्ठः), तस्मै, (उक्तनिर्वेदशिष्याय्)सम्यक्-उपसन्नाय, प्रशान्तचित्ताय, शमान्विताय, तां ब्रह्मविद्यां, तत्वतः, प्रोवाच(प्रब्रूयात्)। येन(=यया ब्रह्मविद्यया), (उक्तशिष्यः), अक्षरं(अक्षरणात्, अक्षतत्वात्, अक्षयत्वात्), पुरुषं(पूर्णत्वात् पुरि शयनात् च), सत्यं(परमार्थस्वाभाव्यात्), वेद(विजानाति)।

तस्मै.....(demo.pro.) तत् (M.)dat.sing.
for him
सः.....(demo.pro.) तत् (M.)nom.sing.
he
विद्वान्.....विद्वान् (M.)nom.sing. (विद्-क्वसु) विद्-to know 2P set
learned person
उपसन्नाय.....(ad.) उपसन्नः (M.)dat.sing., (उप-सद्-क्त), सद्-to sit 6P anit
in order to approach
सम्यक्.....indeclinable (सम्यक्-अञ्च्-क्विप्), अञ्च्-to go 1P set
properly
प्रशान्तचिताय.....(ad.) प्रशान्तचितः (M.)dat.sing., (प्रशान्तं चित्तम् यस्य सः)
one whose mind is quite, tranquill
शमान्विताय.....(ad.) शमान्वितः (M.) dat.sing.,(शमेन अन्वितः यस्य-तृ.ब.व्री.)
one whose inner organs are under control
येन.....(re. pro.) यत् (N.) insrt.sing.
by which
अक्षरम्.....(ad.) अक्षरम् (N.) nom.sing.
not subject to destruction
पुरुषम्.....पुरुषः (M.) acc.sing., (पुरि देहे शेते, पूर्णत्वात्, शी-ड पृषो.)
Purusa
वेद.....विद् 3rd.per.sing.pre.ten.लट्, विद्- to know 2P set विदो लटो वा।३.४.८३
he knows
सत्यम्.....(ad.) सत्यम्(N.)acc.sing., (सते यत्- सत्-यत्)
Truth

प्रोवाच.....प्र-वच् 3rd.per.sing.past.per लिट्, प्र-वच्- to speak 2P anit
he said
ताम्.....(demo.pro.) तत् (F.)acc.sing.
to that
तत्वतः.....indeclinable, (तत्व-तस्)
in a proper way
ब्रह्मविद्याम्.....(ad.) ब्रह्मविद्या (F.) acc.sing., (ब्रह्मणः विद्या-ष.तत्पु.)
knowledge of Brahman

That learned person, should teach the knowledge of Brahman to that dispassionate disciple, who has approached appropriately, whose mind is quite, tranquil and whose sense organs are under control. Because of this knowledge of 'Bramhan', the disciple understands 'Aksaram' as one who is devoid of any change, injury and decay, 'Purusa', who is of the nature of all-pervasiveness and indweller of the body, Satyam, is the supreme reality.

******

**इति मुण्डकोपनिषदि प्रथममुण्डके द्वितीयः खण्डः**

******

## द्वितीय मुण्डक

**तदेतत्सत्यं यथा सुदीप्तात्पावकद्विस्फुलिङ्गाःसहस्रशः प्रभवन्ते सरूपाः ।**
**तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति ॥१॥**

अन्वयः

तत्(कर्मफललक्षणं सत्यं आपेक्षिकं), एतत्सत्यं(परविद्याविलक्षणं, परमार्थलक्षणं), यथा सुदीप्तात्(पावकात्), सहस्रशः(अनेकशः), सरूपाः(अग्निसलक्षणाः), विस्फुलिङ्गाः(अग्न्यवयवाः), प्रभवन्ते(निर्गच्छन्ति)। हे सोम्य! तथा, अक्षरात्(उक्तलक्षणात्), विविधाः (नाना-देहोपाधिभेदाः), भावाः(जीवाः), प्रजायन्ते(प्रभवन्ति), तत्र(तस्मिन्नेवक्षरे), अपियन्ति(अनुलीयन्ते)।

तत्.....(demo.pro.) तत् (N.)acc.sing.
that
एतत्.....(demo.pro.) एतत् (N.)nom.sing.,(इ-अदि-तुँ क्) इ-to go 2P
this
सत्यम्.....(ad.) सत्यम् (N.)acc.sing.,(सते यत्- सत्-यत्)
Trurth
यथा.....indeclinable, (यत्-थाल्)
just as
सुदीप्तात्.....(ad.) सुदीप्तः (M.)alb.sing., (सुष्ठु दीप्त-), (दीप्-क्त), दीप्-to shine 4A set
from well ablazed
पावकात्.....पावकः (M.)alb.sing., (पू-ण्वुल्) पू-to purify 9U set
from fire
विस्फुलिङ्गाः.....विस्फुलिङ्गः (M.)nom.pl., (वि-स्फुर्-डु-विस्फु तादृशं लिङ्गम् अस्ति अस्य)
fly of sparks
सहस्रशः.....indeclinable, (सहस्र-शस्)
thousands
प्रभवन्ते.....छान्दसम् प्रभवन्ति, प्र-भू 3rd.per.pl. pre.ten.लट्, प्र-भू- to be produced 1P set
come out

सरुपाः.....(ad.) सरुपः (M.) nom.pl., (समानं रुपं अस्य-)
resembling, akin
तथा.....indeclinable, (तत्-थाल्)
so to
अक्षरात्.....(ad.) अक्षरः(M.)alb.sing.,(न क्षरति - नञ् ब.व्री.)
from *Akṣara*
विविधाः.....(ad.) विविधः (M.)nom.pl., (विभिन्ना विधा यस्य- प्रा.ब.व्री.)
different kinds
सोम्य.....सोम्यः (M.)voc.sing.,(सोम-यत्)
O, good looking
भावाः.....भावः(M.) nom.pl., (भू-घञ्)
creatures
प्रजायन्ते.....प्र-जन् 3rd.per.pl. pre.ten. लट्, प्र-जन्-to be born 4A anit ज्ञा-जनोर्जा ।७.३.७९
are born
तत्र.....indeclinable, (तत्-त्रल्)
into
च.....indeclinable
and
एव.....indeclinable, (इ-वन्)
indeed
अपियन्ति.....अपि-इ 3rd.per.pl.pre.ten.लट्, अपि-इ- to merge 2P anit
they merge

'That', is relative truth, characterized by the result of Karma. 'This truth', is ultimate charecterized by exalted knowledge. Just as, thousands of sparks of the same form, come out from the fully ablaze fire, so too, O Somya/Good looking! diverese Jivas(in conformity with bodies) originate and they resolve in that Aksara alone.

**दिव्यो ह्यमूर्तः पुरूषः सबाह्याभ्यन्तरो ह्यजः ।**
**अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः ॥२॥**

अन्वयः

(श्रुतिः परमात्मनः निरूपाधिकस्वरूपं आह)। दिव्यः(द्योतनवान् स्वयंज्योतिष्ट्वात्), हि(यस्मात्) अमूर्तः(सर्वमूर्तिवर्जितः), पुरूषः (पूर्णः पूर्णत्वात्, पुरिशयः शरीरे शेते वा), सबाह्याभ्यन्तरः(देहापेक्षया यद् बाह्यः अभ्यन्तरं च प्रसिद्धं, तेन सहाधिष्ठानतया वर्तते इति), अजः(षड्भावविकाराणां जनिमूलत्वात्, जन्मप्रतिषेधेन सर्वे प्रतिषिद्धा भवन्ति।), अप्राणः(अविद्यमानः क्रियाशक्तिभेदवान् चलनात्मकः वायुः यस्मिन्), अमनाः(अनेकज्ञान-शक्तिभेदवत् सङ्कल्पाद्यात्मकं मनः अपि अविद्यमानं इति), शुभ्रः (प्रतिषिद्धोपाधिद्वयः तस्मात् शुद्धः), अक्षरात् परतः(अव्याकृताख्यात् मायायाः), परः(उत्कृष्टः निरूपाधिकः पुरूषः)।

दिव्यः.....(ad.) दिव्यः(M.)nom.sing., (दिव्-यत्) , दिव्- to shine 4P anit
resplendent
हि.....indeclinable
because
पुरुषः.....पुरुषः (M.)nom.sing.,(पुर्-कुषन्)(पुरि देहे शेते-शे-ड पृषो.)
*Puruśa*

सबाह्याभ्यन्तरः.....(ad.) सबाह्याभ्यन्तरः (M.)nom.sing.,(बाह्यः च अभ्यन्तरः च-इ.द्व., बाह्याभ्यन्तरेण सह वर्तते- सह ब.व्री.), (बहिः-ष्यञ्)
coextensive with all that is external and internal

अजः.....(ad.) अजः (M.)nom.sing.,(जन्म न विद्यते यस्य सः-नञ् ब.व्री.)
birthless

अप्राणः.....(ad.) अप्राणः (M.)nom.sing.,(अविद्यमानः प्राणः यस्मिन् असौ-नञ् ब.व्री.)
one who is without *praṇa*

अमनाः.....(ad.) अमनाः (M.)nom.sing.,(अविद्यमानं मनस् यस्मिन् असौ-नञ् ब.व्री.)
one who is without mind

शुभ्रः.....(ad.) शुभ्रः (M.)nom.sing.,(शुभ्- रक्) , शुभ्- to shine 1U,6P
pure

अक्षरात्.....(ad.) अक्षरः (M.)abl.sing.
contextually from Maya

परतः.....(ad.) परम् (N.)abl.sing., (पर-तसि), (पृ-अप्,कर्तरि अच् वा)
from exalted

परः..... (ad.) परः (M.)nom.sing., (पृ-अप्,कर्तरि अच् वा)
more exalted.

Sruti explains the nature of unconditional Brahman- '*Divyah*', self effulgent because of the nature of being resplendent, 'Amurta'- devoid of all forms, 'Purusa' - because of the nature of all pervasiveness or residing in the heart, 'Sabahyabhyantarah'- who is outside with expantancy with the body and also inside, coextensive with both, 'Ajah'- by negating the nature of birth, all six folds of modifications are also negated, 'Apranah' -in whom, power of functioning does not exsist, because there is no Prana, 'Amanah'- one who does not have mind, consisting of thinking and possesing of various power of diverse knowledge, 'Subhra'- pure because of negating Mind and Prana, 'Para'-more exalted than Maya,-i.e 'Aksara', Unconditioned 'Purusa'.

**एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।**
**खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥३॥**

अन्वयः

एतस्मात्(मायावछिन्नचैतन्यात् ब्रह्मणः), प्राणः(नामधेयः अनृतात्मकः) जायते। (यथा अपुत्रस्य पुरुषस्य, स्वप्नदृष्टेन पुत्रेण, सपुत्रत्वं न सम्भवति,तथा शुद्धस्य ब्रह्मणः अविद्याविषयेण अनृतेन प्राणेन, प्राणत्वं न स्यात्)। (एवं एतस्मात् मायावछिन्नचैतन्यात् ब्रह्मणः), मनः सर्वाणीन्द्रियाणि(सर्वे विषयाः जायन्ते)। एतस्मात्(मायावछिन्नचैतन्यात् ब्रह्मणः), खं (आकाशं), वायुः, ज्योतिः(अग्निः), आपः(जलं), विश्वस्य धारिणी(धरित्री) पृथिवी(जायते)।

एतस्मात्.....(demo.pro.) एतद् (M.)abl.sing.
from this.

जायते.....जन् 3rd.per.sing. pre.ten.लट्, जन्- to be born 4A set
is manifested

मनः .....मनस् (N.)nom.sing., (मन्-असुन्) मन्-to think 4A
mind

प्राणः.....प्राणः(M.)nom.sing., (प्र-अन्-अच् or घञ् ) अन्-to breath 2P
Prana

सर्वेन्द्रियाणि.....(ad.) सर्वेन्द्रियाणि(N.)nom.pl., (सर्वे च इन्द्रियाणि च- इत.द्व.)
all sense organs
खम्.....खम् (N.)nom.sing., (खर्व्-ड)
the space
ज्योतिः.....ज्योतिस् (N.) nom.sing., (द्योतते द्युत्यते वा, द्युत्-इसुन् दस्य जादेशः )
the fire
आपस्.....आपस् (N.)nom.sing., (आप्-असुन्)
the water
पृथिवी.....पृथिवी (F.)nom.sing., (प्रथ्-षिंवन्, संप्रसारणम्), प्रथ्-to become famous 1A,10U-set
the earth
विश्वस्य.....विश्वम् (M.)gen.sing., (विश्-व)
of the universe
धारिणी.....धारिणी (F.)nom.sing., (धृ-णिनि-ङीप्) धृ-to support 1U anit
one who supports

From this Brahman along with Maya, Prana is born , which is of the nature of Mithya-(unreal) and mere name is given. Like a person who does not have a son, by mere sight of a son in the dream, his possession of son is not possible, similarly, Brahman which is free from all attributes, does not have a nature of Prana, which is unreal and in the form of ignorance.

From this Brahman along with Maya, mind, all sense organs and organs of action and objects are born. And also space, air, fire, water and earth, which is the sustainer of all are born.

**अग्निमूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः ।**
**वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा॥ ४॥**

अन्वयः

एषः सर्वभूतान्तरात्मा(त्रैलोक्यदेहोपाधिः), अग्निमुर्धा(अग्निः, द्युलोकः मूर्धा शिरः यस्य सः), चन्द्रसूर्यौ चक्षुषी नेत्रे(चन्द्रः च सूर्यः चन्द्रसूर्यौ यस्य), श्रोत्रे कर्णौ दिशः(यस्य पुरूषस्य), वाग् विवृताः वेदाः च(यस्य), प्राणः वायुः(यस्य), विश्वं हृदयं (यस्य), (यस्य) पद्भ्यां पृथिवी(जाता), (तस्य ईश्वरस्य पुरुषस्य एतानि अङ्गानि जातानि।)

अग्निमूर्धा.....(ad.) अग्निमूर्धन् (M.)nom.sing., (अग्निः मूर्धा यस्य सः- ब.व्री.)
one whose head is fire=heaven
चक्षुषी.....चक्षुस् (N.)nom.dual., (चक्ष्-उसि) चक्ष्-to tell 2Aset
two eyes
चन्द्रसूर्यौ.....(ad.) चन्द्रसूर्यौ (M.)nom.dual, (चन्द्रः च सूर्यः च- इ.द्व.)
the moon and the sun
दिशः.....दिक्/दिग् (F.)nom.sing., (दिशति ददाति अवकाशम्, दिश्-क्विप्) दिश्-to see 6U anit
directions
श्रोत्रे.....श्रोत्रम् (N.)nom.dual, (श्रु-ष्ट्रन्) श्रु- to hear 1Panit
the ear
वाक्.....वाक् (F.)nom.sing., (वच्-क्विप्) वच्- to speak 2Panit
speech
विवृताः.....(ad.) विवृतः (M.)nom.pl., (वि-वृत्-क्त), वृत्- to be 4A anit
well known
वायुः.....वायुः (M.)nom.sing., (वा-उण् युक् च उणा,सू..१.१) वा--to blow 2Panit
air

प्राणः.....प्राणः (M.)nom.sing., (प्र-अन्-अच् or घञ् ) अन्-to breath 2P
Prana
हृदयम्.....हृदयम् (N.)nom.sing.,(हृ-कयन्, दुक् आगमः), हृ-to take away 1P anit
heart
विश्वम्.....(ad.) विश्वम् (N.)nom.sing., (विश्-व) विश्- to enter 6P
the universe
अस्य.....(demo.pro.) इदम् (M.)gen.sing.
of this
पद्भ्याम्.....पदम् (N.)alb.dual, (पद्-अच्) पद् -to achieve 4Aanit
out of the two feet
पृथिवी.....पृथिवी (F.)nom.sing., (प्रथ्-षिंवन्, संप्रसारणम्), प्रथ्- to become famous 1A,10U-set
the earth
हि.....indeclinable
indeed
एष.....(demo.pro.) एतद् (M.)nom.sing.
this
सर्वभूतान्तरात्मा.....(ad.) सर्वभूतान्तरातन् (M.)nom.sing., (सर्वेषां भूतानां-सर्वभूतः ष.तत्पु., सर्वभूतेषु अन्तः- स.तत्पु. सर्वभूतान्तः, सर्वभूतान्तः आत्मा यस्य सः ब,व्री.)
the indwelling self of all

This is the indwelling self of all, obtaining all three worlds. For whom, the head is fire i.e. heaven.The Moon and the Sun are the two eyes, the directions are two ears, well-known Vedas are speech, air is Prana, heart is the whole universe, the earth is born from the two feet. All these organs belong to that Isvara.

**(पञ्चाग्निद्वारेण प्रजोत्पतिः)**

**तस्मादग्निः समिधो यस्य सूर्यःसोमात्पर्जन्यः ओषधयः पृथिव्याम् ।**
**पुमान् रेतः सिञ्चति योषितायां बह्वीः प्रजाः पुरुषात्सम्प्रसूताः ॥५॥**

अन्वयः

तस्माद्(अक्षरात्), अग्निः(प्रजावस्थानविशेषरूपः जातः), यस्य(अग्नेः), सूर्यः समिधः(इव)। (सूर्येण हि द्युलोकः समिध्यते, द्युलोकात् सोमः जातः), सोमात्(चन्द्रात्) पर्जन्यः(द्वितीयोऽग्निः सम्भवति)। (पर्जन्यात्), पृथिव्यां(पृथिवीरूपतृतीयाग्नौ), ओषधयः (सम्भवन्ति)। (ओषधिभ्यः अन्नरूपेण चतुर्थाग्निरूपः पुरुषः जातः)।पुमान् रेतः(शुक्रः), योषितायां(पञ्चाग्निरूपायां स्त्रियां) सिञ्चति। (एवं क्रमेण), पुरुषात्(अक्षरात्), बह्वीः(बह्व्यः), प्रजाः सम्प्रसूताः(सम्यक् प्रादुर्भवन्ति)।

तस्मात्.....(demo.pro.) तद् (M.)alb.sing.
from that.
अग्निः.....अग्निः(M.)nom.sing., (अङ्गति ऊर्ध्वं गच्छति- अङ्ग्-नि नलोपः) अङ्ग्-to mark 10Uset
the fire
समिधः.....समिधः(M.)nom.sing., (सम्-इन्ध्-क) इन्ध्-to shine 7Pset
fuel
यस्य.....(demo.pro.) यत् (M.)gen.sing.
of which
सूर्यः..... सूर्यः (M.)gen.sing., (सृ-क्यप्) सृ- to go 1P Anit
the sun

सोमात्.....सोमः(M.)alb.sing., (सू-मन्) सू-to produce 4A,2P-set
the moon
पर्जन्यः.....पर्जन्यः(M.)nom.sing., (पृष्-शन्य, नि.पकारस्य जकारः), पृष्-to sprinkle 1Pset
rainy cloud
ओषधयः.....ओषधिः (F.)nom.pl., (ओष-धा-कि, स्त्रीयां ङीष्)
herbs
पृथिव्याम्.....पृथिवी(F.)loc.sing., (प्रथ्-षिंवन् ,संप्रसारणम्) प्रथ्-to become famous 10Uset
the earth
पुमान्.....पुंस् (M.)nom.sing., (या-डुयसुन्) या-to go 2P anit
man
रेतः.....रेतस् (N.)nom.sing., (री-असुन्, तुट् च) री-to go 9P anit
semen
सिञ्चति.....सिञ्च् 3rd.per.sing.pre.ten.लट्, सिच् -to pour in 6Panit शे मुचादीनाम्।७.१.५९
to shed
योषितायाम्.....छान्दसम् योषिति, योषित् (F.)loc.sing., (यौति मिश्री भवति-युष्-इति, योषित्-टाप्)
into a woman
बह्वीः.....छान्दसम् बह्व्यः,(ad.) बह्वी (F.)nom.pl., (बह्-कु नलोपः)
many
प्रजाः.....प्रजा (F.)nom.pl., (प्र-जन्-ड-टाप्)
creatures
पुरुषात्.....पुरुषः (M.)abl.sing., (पुर्-कुषन्), (पुरि देहे शेते-शे-ड पृषो.)
from *puruśa*

From that Aksara, the first fire, is a particular abode of creatures i.e. heaven is born. For whom the sun is as though fuel, because of the Sun heaven is lit up. From the heaven moon is born. From the moon second fire, cloud is born. From that cloud in the earth which is third fire, herbs are born. From the herbs the man in the form of food, is the fourth fire; is born. The semen of the man sheds into a woman, is the fifth fire. In this order many creatures are originated from that Aksara.

**तस्मादृचः साम यजूंषि दीक्षा यज्ञाश्च सर्वे क्रतवो दक्षिणाश्च ।**
**संवत्सरश्च यजमानश्च लोकाः सोमो यत्र पवते यत्र सूर्यः ॥६॥**

अन्वयः

तस्मात् (पुरुषात्), ऋचः(नियताक्षरपादाः मन्त्राः जाताः)। (तथा च), साम(पाञ्चभक्तिकं, साप्तभक्तिकं च स्तोभादिगीतविशिष्टं जातम्)। (तथा च), यजूंषि(अनियताक्षरपादावसानानि वाक्यरूपाण्येवं त्रिविधा मन्त्राः जाताः)। दीक्षा(मौञ्ज्यादिलक्षणा कर्तुनियम-विशेषाः)। यज्ञाः(सर्वे अग्निहोत्रादयः), क्रतवः(सयूपाः), दक्षिणाः(एकगवादि अपरिमितसर्वस्व-अन्ताः), संवत्सरः(कालः), यजमानः(कर्ता), लोकाः(दक्षिणायन-उत्तरायणमार्गद्वयगम्याः कर्मफलभूताः), यत्र(येषु लोकेषु) सोमः(चन्द्रः),पवते(पुनाति), यत्र(येषु लोकेषु), सूर्यः तपति।

तस्मात्.....(demo.pro.) तत्( M.)alb.sing.
from that
ऋचः.....ऋक् (F.)nom.sing., (ऋच्-क्विप्) ऋच्- to praise 6P set
hymns
साम .....सामन् (N.)nom.sing., (सो-मनिन्) सो- to bring 4P anit
Sama song

यर्जूषि.....यजूस् (N.)nom.pl., (यज्-उसि) यज्-to worship 1U anit
The mantras which are in Yajus
दीक्षा.....दीक्षा (F.)nom.sing., (दीक्ष्-अ-टाप्) दीक्ष्-to self restrain 1A set
initiation before performing any sacrifice
यज्ञाः.....यज्ञः(M.)nom.pl., (यज्-भावे नङ्) यज्-to worship 1U anit
sacrifices
सर्वे.....(demo.pro.) सर्व (M.)nom.pl.
all
क्रतवः.....क्रतुः (M.)nom.pl., (कृ-कतु) कृ-to do 8U anit
sacrifice which requirs post
दक्षिणाः.....दक्षिणा (F.)nom.pl., (दक्षिण-टाप्)
offering
संवत्सरः.....संवत्सरः (M.)nom.sing., (संवसन्ति ऋतवः अत्र- संवस्-सरन्)
year,time
यजमानः.....(ad.) यजमानः (M.)mon.sing., (यज्-शानच्) यज्-to worship 1U anit
the sacrificer
लोकाः.....लोकः (M.)nom.pl.,(लोक्यते अनेन ,लोक्-घञ्) लोक्-to experience 1A set
the worlds
सोमः.....सोमः (M.)nom.sing., (सू-मन्)
the moon
यत्र.....indeclinable, (यत्-त्रल्) सप्तम्याः त्रल्। ५.३.१०
in which (inherent locative meaning)
पवते.....पू 3rd.per.sing.pre.ten.लट्, पू-- to purify 1A set
sanctifies
सूर्यः.....सूर्यः (M.)nom.sing.
(सरति आकाशे सूर्यः,वा सुवति कर्मणि लोकं प्रेरयति, सृ-क्यप्), सृ-to move 1P.3P anit
the sun

From that Pususa, these three type of hymns are born. Those Hymns which have well regulated/coined letters and meters, Sama which is divided into five parts or seven parts and specially Stobha emerge, Yajushi which does not have any fixed letters, meters and length, and also in sentence form, Diksha- the specific rules for sacrificer like munja grass girdle,sacrifices like aghnihotras etc, Kratavah- along with sacrificial post, Dakshina-offering to priests and other brahmanas starting from one cow upto all that one possesses, Savatsar-time, Yajamanah-one who does sacrifice, Lokah-of the nature of the result of action which are to be attained through Sourthen and Northern paths, where in which worlds, the moon sanctifies and the sun shines emergre.

**तस्माच्च देवा बहुधा सम्प्रसूताः साध्या मनुष्याः पशवो वयांसि ।**
**प्राणापानौ व्रीहियवौ तपश्च श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च ॥७॥**

अन्वयः

तस्मात्(अक्षरात्), बहुधा(नानाविधाः), देवाः(कर्माङ्गभूताः), साध्याः(देवविशेषाः), मनुष्याः(कर्माधिकृताः), पशवः(ग्राम्याः आरण्याः च), वयांसि(पक्षिणः), प्राणापानौ(प्राणिनां जीवनहेतुभूतौ), व्रीहियवौ(हविःअर्थः), तपः(कृच्छ्रचान्द्रायणादि रूपम्), श्रद्धा(आस्तिक्य-बुद्धिः), सत्यं(अनृतवर्जनं, अपीडाकरं यथाभूतार्थवचनं), ब्रह्मचर्यं(मैथुनपरित्यागात्मकं) विधिः(कर्तव्यता), (सर्वे) सम्प्रसूताः (सम्यगुत्पन्नाः)।

तस्मात्.....(demo.pro.) तद् (M.)alb.sing.
from that.
देवाः.....देवः (M.)nom.pl., (दिव्-अच्) दिव्-to shine 4P anit
devatas
बहुधा.....indeclinable, (बहु-धाच्) सङ्ख्याया विधार्थे धा।५.३.४२
various
सम्प्रसुताः.....(ad.) सम्प्रसुतः(M.)nom.pl., (सम्-प्र-सृ-क्त) सृ-to move 1P. anit
emerged
साध्याः.....(ad.) साध्यः (M.)nom.pl., (साध्-णिच्-यत्) साध्-to accomplish 5P set
particular class of gods
मनुष्याः.....मनुष्यः(M.)nom.pl., (मनोः अपत्यम्- यक् सुक् च)
human beings
पशवः.....पशुः (M.)nom.pl., (सर्वं अविशेषेण पश्यति, दृश्-कु,पशादेशः)
beasts
वयांसि.....वयस् (N.)nom.pl., (अज्-असुन्, वीभावः) अज्-to go 1Pset
birds
प्राणापानौ.....(ad.) प्राणापानः (M.)nom.dual, (प्राणः च अपानः च- इत.द्व.)
life (contextually)
व्रीहियवौ.....(ad.) व्रीहियवः (M.)nom.dual, (व्रीहिः च यवः च- इत.द्व.)
rice and barley
तपः.....तपस् (N.)nom.sing. (तप्-असुन्) तप्-to heat 1P set
austerity
श्रद्धा.....श्रद्धा (F.)nom.sing., (श्रत्-धा-अङ्-टाप्)
trust
सत्यम्.....(ad.) सत्यम् (N.)nom.sing., (सत्-यत्)
truth
ब्रह्मचर्यम्.....ब्रह्मचर्यम् (N.)nom.sing., (बृह्-मनिन्, नकारस्याकारे ऋतः रत्वम्)
continence
विधिः.....विधिः (F.)nom.sing., (वि-धा-कि) धा-to bear 3U anit
dutifulness

From that Purusa various forms duly emerge. Devatas who are of the nature of being ancillary to Karmas, Sadhyas who are a particular class of Devatas, human beings who are eligible for karma, beasts which are both wild as well as domestic, birds, breathing in and out are of the nature of the cause of life, rice and barley for the sake of offering, austerities like Krchha and Chandrayana, Sraddha is tranquil mind which is taught in the scripture and by the guru, truth is avoiding of falsehood and also speaking of fact as they are without causing injury, avoidance of sexual relation and dutifulness emerge..

**सप्त प्राणाः प्रभवन्ति तस्मात् सप्तार्चिषः समिधः सप्त होमाः ।**
**सप्त इमे लोका येषु चरन्ति प्राणा गुहाशया निहिता सप्त सप्त ॥८॥**

अन्वयः

तस्मात्(पुरुषात्), सप्त प्राणाः(इन्द्रियाणि, द्वे श्रोत्रे, द्वे चक्षुषी, द्वे घ्राणे, एका वाग्), प्रभवन्ति। सप्तार्चिषः(उक्तेन्द्रियाणां सप्तवृत्तयः), सप्त समिधः(सप्त विषयाः), सप्त होमाः(तद्विषयविज्ञानानि), इमे सप्तलोकाः(इन्द्रियगोलकाः), येषु(गोलकेषु)प्राणाः चरन्ति।
सप्त सप्त(ये प्रतिप्राणिशरीरं सप्तसप्तसंख्यकाः), गुहाशयाः(गुहायां, शरीरे, हृदये वा स्वापकाले शेरते इति), निहिताः(स्थापिताः धात्रा)।

सप्त.....(nu.ad.) सप्तन् nom.pl., (सप्-तनिन्), सप्-to connect 1P set
seven, (same in all genders and in plural only),
प्राणाः.....प्राणः(M.)nom.pl., (प्र-अन्-अच् or घञ् ) अन्-to breath 2P
Pranas, sense organs
प्रभवन्ति.....प्र-भू 3rd.per.pl.pre.ten.लट्, प्र-भू- to originate 1P set
they emerge
तस्मात्.....(demo.pro.) तद् (M.)alb.sing.
from that
अर्चिषः.....अर्चिस् (N.)nom.pl., (अर्च्-इसि उणा.सू.2.107) अर्च्-to worship 10U set
flames
समिधः.....समिध् (M.)nom.pl.sing., (सम्-इन्ध्-क) इन्ध्-to shine 7Pset
fuel
होमाः.....होमः (M.)nom.pl., (हु-मन्) हु-to offer 3P anit
oblations
इमे.....(demo.pro.) इदम्(M.)nom.pl.
these
लोकाः.....लोकः (M.)nom.pl.,(लोक्यते अनेन, लोक्-घञ्) लोक्-to experience 1A set
the worlds
येषु.....(re.pro.) यद् (M.)loc.pl.
in which
चरन्ति.....चर् 3rd.per.pl.pre.ten.लट्,चर्-to move 1P set
they move
गुहाशयाः.....(ad.) गुहाशयाः(M.)nom.pl., (गुहायां आशयः यस्य सः- ब.व्री.)
one who resides in the body
निहिताः.....(ad) निहितः(M.)nom.pl., (नि-धा-क्त) दधातेः हिः।७.४.४२ धा- to bear 3P anit
resided

From that Purusa, the seven sense organs, seven flames which illumine their objects, seven fuel i.e.seven sense objects, seven oblations according to their sense objects, seven organs of action, in which the sense organs are located at the time of sleep, in the heart or in the body and they function. These groups of seven are made to reside in every living being by Bramhaji.

**अतः समुद्रा गिरयश्च सर्वेऽस्मात्स्यन्दन्ते सिन्धवः सर्वरूपाः ।**
**अतश्च सर्वा ओषधयो रसश्चयेनैष भूतैस्तिष्ठते ह्यन्तरात्मा ॥९॥**

अन्वयः

अतः(अस्मात् पुरुषात्), सर्वे समुद्राः(क्षारोदः, इक्षुरसोदः, सुरोदः, घृतोदः, क्षीरोदः, दध्युदकः, शुद्धोदकः), गिरयः(पर्वताः प्रभवन्ति)। अस्मात्(पुरुषात्), सर्वरूपाः(अनेकरूपाः) सिन्धवः(नद्याः), स्यन्दन्ते(स्रवन्ति)। अतः(अस्मात् पुरुषात्), सर्वा ओषधयः, रसः(षडविधः जातः)। येन(रसेन), एष अन्तरात्मा, (स्थुलैः पञ्चभिः)भूतैः, (परिवेष्टितः), तिष्ठते(तिष्ठति)।

अतः.....indeclinable, (इदम्-तसिल्) पञ्चम्याः तसिल्।५.३.७
from this
समुद्राः.....समुद्रः (M.)nom.pl., (सम्-उद्-रा-क)
the oceans
गिरयः.....गिरिः (F.)nom.pl., (गॄ-इ किच्च) गॄ- to call out 9P set
the mountains

सर्वे.....(demo.pro.) सर्व (M.)nom.pl.
all
अस्मात्.....(demo.pro.) इदम् (M.)abl.sing.
from this
स्यन्दते.....स्यन्द् 3rd.per.sing.pre.ten.लट्, स्यन्द्-to flow out 1A vet
it flows out
सिन्धवः.....सिन्धुः (F.)nom.pl., (स्यन्द्-उद् संप्रसारणं दस्य धः)
the rivers
सर्वरूपाः.....(ad.) सर्वरूपा (F.)nom.pl., (सर्वा एव रूपा - कर्म.धा.)
various forms
ओषधयः.....ओषधिः (F.)nom.pl., (ओष-धा-कि, स्त्रीयां ङीष्)
herbs
रसः.....रसः (M.)nom.sing., (रस्-अच्)
juice
येन.....(re. pro.) यत् (N.) insrt.sing.
by which
एषः.....(demo.pro.) एतद् (M.)nom.sing.
this
भूतैः.....(ad.) भूतः(M.)intr.pl., (भू-क्त) भू-to be 1Pset
by elements
तिष्ठते.....छान्दसम्-तिष्ठति स्था-3rd.per.sing.pre.ten.लट्, स्था-to stand 1P anit
remains
अन्तरात्मा.....(ad.) अन्तरात्मन् (M.)nom.sing.,(अन्तः आत्मा यस्य सः ब.व्री.)
the internal self

From this Purusa emerge, all the seven oceans and mountains, various forms of rivers flow out, all herbs and six kinds of juices. This internal self exists by the virtue of this juice in the form of grossified five elements.

**पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम्।एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य॥१०॥**

अन्वयः

इदं विश्वं(सर्वं), पुरुषः एव, (पुरुषात् अन्यत् किञ्चित् नास्ति)। (एतस्मिन्पुरुषे सर्वकारणे विज्ञातेः 'इदं सर्वं पुरुषः एव' इति विज्ञातं भवति)।(किं इदं विश्वं ?)। विश्वं(कर्माग्निहोत्रादिलक्षणं), तपः(उपासना), (कर्मोपासानाभ्यां कृतं फलं हि इदं सर्वम्)। (तस्मात् सर्वं), ब्रह्म परामृतम्। हे सोम्य(प्रियदर्शन), यः एतद्(परामृतं ब्रह्म अहमेवेति), निहितं गुहायां(हृदि), वेद(जानाति), सः इह(जिवन्नेव, न मृतः सन्), अविद्याग्रन्थिं(दृढीभूतां, अविद्यावासनां) विकिरति(नाशयति)।

पुरुषः.....पुरुषः (M.)nom.sing.,(पुर्-कुषन्), (पुरि देहे शेते-शे-ड पृषो.)
Purusa
एव.....indeclinable
indeed
इदम्.....(demo.pro.) इदम्(M.)nom.sing..
this
विश्वम्.....(ad.) विश्वम् (N.)nom.sing., (विश्-व) विश्- to enter 6P
the universe

तपः.....तपस् (N.)nom.sing., (तप्-असुन्) तप्-to heat 1P set
austerity
कर्म.....कर्मन् (N.)nom.sing., (कृ-मनिन्) कृ- to do 8U
Karma
ब्रह्म.....ब्रह्म (N.) nom.sing.
Brahman
परामृतम्.....(ad.) परामृतम् (N.)nom.sing., (परमं च अमृतं च- समा.द्व.)
Brahman which is not bound by time
एतद्.....(demo.pro.) एतत् (N.)nom.sing.
this
यः.....(re. pro.) यत् (M..)nom.sing.
one who
वेद.....विद् 3rd.per.sing.pre.ten.लट्, विद्- to know 2P set विदः लटो वा।३.३.१४
he/she knows
निहितम्.....(ad) निहितम् (N.)nom.sing.., (नि-धा-क्त), धातेः हिः।७.४.४२ धा- to bear 3P anit
resided
गुहायाम्.....गुहा (F..)loc.sing., (गुह्- टाप्) गुह्-to conceal 1U anit
in the heart
सः.....(re. pro.) तत् (M..)nom.sing.
he
अविद्याग्रन्थिम्.....(ad.) अविद्याग्रन्थिः (F.)acc.sing., (अविद्या एव ग्रन्थिः-कर्म.धा.), (ग्रन्थ्-इन्) ग्रन्थ्- to tie 1,9P set
the knot of ignorance
विकिरति.....वि-कॄ 3rd.per.sing.pre.ten.लट्,वि-कॄ- to scatter 6P set
destroys, unties
इह.....indeclinable, (इदम्-ह इशादेशः)
here
सोम्य.....सोम्यः (M.)voc.sing.,(सोम-यत्)
O Somya, good looking youth

All this universe is indeed Purusa. There is nothing other than Purusa. Knowing this Purusa, as the cause of everything, that "this all is Purusa", everything becomes known. "What this all?", Visvam is characterized by karma, like agnihotra and etc, tapas means upasana, whatever is here, is the result of accruing from Karma and Upasana.Therefore "all is Brahman", which is not bound by time. O good looking! one who knows this Brahman as myself in the heart, even while living, he destroys the knot of ignorance.

******

इति मुण्डकोपनिषदि द्वितीयमुण्डके प्रथमः खण्डः

******

**आविः संनिहितं गुहाचरं नाम महत्पदमत्रैतत्समर्पितम्। एजत्प्राणन्निमिषच्च यदेतज्ञानथ सदसद्वरेण्यं परं विज्ञानाद्यद्वरिष्ठं प्रजानाम् ॥१॥**

अन्वयः

आविः(प्रकाशस्वरुपं ब्रह्म), संनिहितं(सम्यक् स्थितं), (हृदि)गुहाचरं नाम। (वा दर्शनश्रवणादिप्रकारैः बुद्धौ गुहायां चरतीति), महत्(सर्वमहत्वात्), पदं(सर्वेण पद्यते, सर्वपदार्थ-आस्पदत्वात्)। अत्र(अस्मिन्ब्रह्मणि), एतत्(सर्वं), एजत्(चलत्, पक्ष्यादि), प्राणत्(प्राणिति, मनुष्यपश्वादि), निमिषत्(निमेषक्रियावत्), च(समस्तं), समर्पितं(निवेशितम्)। यत्(ब्रह्म), सत्(मूर्तं),

असत्(अमूर्तं), वरेण्यं(सर्वस्य प्रार्थनीयं नित्यत्वात्), यत्प्रजानां(लौकिकं) विज्ञानात् परं(वरिष्ठम् सर्वदोषरहितत्वात्), (हे शिष्याः), एतद्(ब्रह्म) जानथ(अवगच्छथ)।

आविः.....indeclinable, (आ-अव्-इस्) अव्-to protect 1P set
effulgent

संनिहितम्.....(ad) संनिहितम्(N.)nom.sing., (सम्यक् निहितम्), (नि-धा-क्त) धा- to bear 3P anit
resided properly

गुहाचरम्.....(ad.) गुहाचरम् (N.)nom.sing., (गुहायां चरति-उप.तत्पु.),(गुह्-टाप्),गुह्-to conceal 1U anit
one who obtains in the heart

नाम.....indeclinable, (नम्-णिच्-ड) नम्-to salute, to sound 1P anit
known

महत्.....(ad.) महत्(N.)nom.sing., (मह्-अति) मह्-to honour 1P set
great

पदम्.....पदम् (N.)nom.sing., (पद्-अच्) पद्- to attain 4A anit
a goal

अत्र.....indeclinable, (इदम्-त्रल्, प्रकृतेः अश्भावः च)(सप्तम्याः त्रल् ।५.३.१०)
in this

एतत्.....(demo.pro.) एतत्(N.)nom.sing.
this

समर्पितम्.....(ad.) समर्पितम्(N.)nom.sing., (सम्-ऋ-णिच्-क्त)अति-ह्वि-व्ली-री-क्नुयी-क्ष्मा-य्यातां पुग्णौ।७.३.३६ ऋ- to go 1P
resorted

एजत्.....(ad.) एजत्(N.)nom.sing., (एज्-शतृ) एज्-to move 1P set
moving

प्राणत्.....(ad.) प्राणत्(N.)nom.sing., (प्र-अन्-शतृ) अन्-to breathe 2P anit
breathing

निमिषत्.....(ad.) निमिषत्(N.)nom.sing., (नि-मिष्-शतृ) मिष्- to open the eyes 6Pset
winking

यत्.....(re.pro.) यद्(N.)nom.sing.
which

जानथ.....छान्दसम् जानीथ ज्ञा-2nd.per.pl.pre.tenलट्, ज्ञा- to know 9P anit
you all know

सत्.....(ad.) सत् (N.)nom.sing., (अस्-शतृ अकारलोपः) अस्-to be 2Pset
contextually- form,gross

असत्.....(ad.) असत् (N.)nom.sing., (सत् न विद्यते तत् -नञ् ब.व्री.)
contextually- subtle

वरेण्यम्..... (ad.) वरेण्यम् (N.)nom.sing., (वृ-एन्य) वृ-to choose 5U anit
to be wished for

परम्..... (ad.) परम् (N.)nom.sing. (परं परत्वं माति-क तारा.)
exalted

विज्ञानात्.....(ad.) विज्ञानम् (N.)alb.sing. (वि-ज्ञा-ल्युट्) ज्ञा-to know 9P anit
from the knowledge

वरिष्ठम्.....(ad.) वरिष्ठम् (N.)nom.sing., (अयमेषामतिशयेन वरः उरुः वा, उरु-इष्ठन्, वरादेशः)
most exalted

प्रजानाम्……प्रजा (F.)gen.pl., (प्र-जन्-ड-टाप्) जन्-to be born 4P anit
of the people
Brahman is effulgent, abiding in the heart or one who obtains in the intellect through the cognitions of listening and seeing, is great, being the nature of greatness, it is a goal, is attained by all, being the nature of abode. Moving like birds, breathing like human beings, beasts who wink, all are resorted in this Brahman, like (wrap and woof). O disciples! May you know that Brahman which is gross, is subtle, being eternal always prayed for and is the most exalted compared to wordly knowledge, because of being bereft of all defects.

**यदर्चिमद्यदणुभ्योऽणु च यस्मिंल्लोका निहिता लोकिनश्च। तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ्मनः। तदेतत्सत्यं तदमृतं तद्वेद्धव्यं सोम्य विद्धि ॥२॥**

अन्वयः

यदर्चिमत्(दिप्तिमत् ब्रह्म), अणुभ्यः अणु(सूक्ष्मात् सूक्ष्मम्), च(स्थुलेभ्यः स्थूलम्), यस्मिन्(अर्चिमति ब्रह्मणि), लोकाः(भूरादयः) लोकिनः(लोकनिवासिनः मनुष्यादयः) निहिताः(स्थिताः)। तदेतद्(सर्वाश्रयं), अक्षरं(ब्रह्म), सः(एव) प्राणः,तत् उ वाङ्मनः(सर्वाणि इन्द्रियात्मकम्)। (यत् अर्चिमत्, अक्षरं ब्रह्म),तदेतत् सत्यं(अवितथं), तदमृतं(अविनाशि), तदेदत्(ब्रह्म), हे सोम्य! वेद्धव्यं (तस्मिन् मनःसमाधानं कर्तव्यं), विद्धि(अक्षरे चेतः समाधत्स्व)।

यत्……(re.pro.) यद्(N.)nom.sing.
which
अर्चिमत्……छान्दसम् अर्चिर्मत् (ad.) अर्चिमत् (N.)nom.sing., (अर्चिः अस्य अस्ति तत्)
one which is bright
अणुभ्य……(ad.) अणु (N.)alb.pl., (अण्-उन्) अण्-to sound 1P set
subtler than
अणु……अणु (N.)nom.sing.
subtler
यस्मिन्……(re.pro.) यद्(N.)loc.sing.
in which
लोकाः……लोकः (M.)nom.pl. (लोक्यते अनेन-लोकः) लोक्-to perceive 1A set
worlds
निहिताः……(ad) निहितः(M.)nom.pl., (नि-धा-क्त) दधातेः हिः।७.४.४२ धा- to bear 3P anit
resided
लोकिनः……लोकिन् (M.)nom.pl., (लोक्-इनि)
one who dwells in the world
तत्……(demo.pro.) तत्(N.)acc.sing.
that
एतत्……(demo.pro.) एतत्(N.)nom.sing.
this
अक्षरम्……(ad.) अक्षरम्(N.)nom.sing.
one who never subject to perish
ब्रह्म……ब्रह्म (N.)nom.sing.
Brahman
प्राणः……प्राणः(M.)nom.sing., (प्र-अन्-अच् or घञ् ) अन्-to breath 2P
Prana

वाक्.....वाक्(F.)gen.sing., (वच्-क्विप्) वच्-to speak 2P
speech
मनः.....मनस् (N.)nom.sing., (मन्-असुन्) मन्-to think 4A
mind
सत्यम्.....(ad.) सत्यम् (N.)nom.sing., (सत्-यत् )
gross five elements
अमृतम्.....(ad.) अमृतम् (N.)nom.sing., (न मृतम् -नञ् तत्पु.) (मृ-क्त) मृ-to die 4A
contextually-Result of Karmas
वेद्धव्यम्.....(ad.) वेद्धव्यम्(N.)nom.sing, (विध्-तव्यत्), विध्-to pierce 6P set
to be penetrated
सोम्य.....सोम्यः (M.)voc.sing., (सोम-यत्)
O Good looking
विद्धि.....विद् 2nd.per.sing. imperative लोट्,विद्- to know 2P set
may you know

That which is bright, subtler than the subtlest and grosser than the grossest, in which the worlds like Earth and the dwellers of the world are residing, that which is the abode of all; 'That', alone is prana, speech, mind and all organs of sense as well as actions. 'That', is the truth, which is not subject to death and that is Brahman. O good looking, that should be penetrated, in that alone mind should be fixed. Let Bramhan, be in your mind.

**धनुर्गृहित्वौपनिषदं महास्त्रं शरं ह्युपासानिशितं सन्धयीत ।**
**आयम्य तद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सोम्य विद्धि ॥३॥**

अन्वयः

हे सोम्य!, औपनिषदं(उपनिषत्सु प्रसिद्धं प्रणवाख्यं), महास्त्रं धनुः गृहित्वा(आदाय), (तस्मिन्धनुषि), शरं(बाणं) सन्धयीत(सन्धानं कुर्यात्)।(कीदृशं शरं?)। उपासानिशितं(उपासनयाभिध्यानेन तीक्ष्णीकृतं शरम्)। तद्भावगतेन(ब्रह्मभावनिष्ठेन), चेतसा(मनसा), आयम्य(सेन्द्रियमन्तःकरणं स्वविषयात् विनिवर्त्य लक्ष्येऽव स्थिरं कृत्वा), तदेव अक्षरं(ब्रह्म) लक्ष्यं विद्धि(अक्षरे चेतः समाधत्स्व)।

धनुस्.....धनुस्(N.)acc.sing., (धन्-उसि) धन्-to make a sound 1P anit
a bow
गृहीत्वा.....ind. past participle, (ग्रह्-क्त्वा) ग्रह्-to grasp 9P set
having taken
औपनिषदम्.....(ad.) औपनिषदम् (N.)acc.sing., (उपनिषद्-अण्)
in the Upanisad
महास्त्रम्.....महास्त्रम् (N.)acc.sing.,(महत् च तत् अस्त्रम्- क.धा.)
great weapon
शरम्.....शरः (M.)acc.sing., (शॄ-अच्) शॄ-to kill.to pierce 9Pset
an arrow
उपासानिशितम्.....(ad.) उपासानिशितः(M.)acc.sing.(उपासया निशितम्-तृ.तत्पु.)(नि-शो-क्त) शो-to sharpen 4P anit
sharpened through meditation
सन्धयीत.....छान्दसम्-सन्दधीत, सं-धा 3rd.per.sing.pot.mood.वि.लिङ्, सं-धा- to fix upon 3U anit
one should fix upon
आयम्य.....ind. past.part, (आ-यम्-ल्यप्) आ-यम्- to streched out1P anit
having pulled back

तद्भावगतेन.....(ad.) तद्भावगतम् (N.)insrt.sing.,(तस्य भावः-ष.तत्पु., तद्भावे गतं-स.तत्पु., तेन)
with absorbed thought
चेतसा.....चेतस् (N.)instr.sing., (चित्-असुन्) चित्-to understand 1P set
with mind
लक्ष्यम्.....(ad.) लक्ष्यम् (N.)acc.sing., (लक्ष्-ण्यत्), लक्ष्-to observe 1A set
target
सोम्य.....सोम्यः (M.)voc.sing.
O Good looking
विद्धि.....विद् 2nd.per.sing. imperative लोट्,विद्- to know 2P set
may you know

Having taken the great bow which is familiar in the Upnisad by the name 'Om', on that bow one should fix the arrow. Which type of arrow? An arrow which is sharpened through meditation. Having pulled back the sense organs from its own objects and having fixed, through that mind which is absorbed in Brahman, one should hit the target which doesnot alter its target. Let Brahman, be in your mind.

**प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।**
**अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥४॥**

अन्वयः

प्रणवः(ॐकारः), धनुः, शरः(बाणः), हि आत्मा(एव जीवः, मनः)। (प्रणवः धनुः, आत्मा मनः शरः एव, सः शरः एव प्रणवालम्बेन), तत्(तस्य उक्तात्मरूपस्य), अप्रमत्तेन(सर्वतः विरक्तेन, ऐकाग्रचित्तेन), ब्रह्म लक्ष्यं(एकात्मत्वं फलरूपं) वेद्धव्यं, उच्यते(वेदविद्भिः)। (लक्ष्यं वेधनात् उर्ध्वं), शरवन्तन्मयः भवेत्(यथा शरस्य लक्ष्येकात्मत्वं भवति तथा देहाद्यनात्मप्रत्ययनिरासेन अक्षरे-एकत्वं संपादयेत्।

प्रणवः.....प्रणवः (M.)nom.sing., (प्र-नू-अप्, णत्वम्) , नू-to praise 6P set
ॐकारः
धनुः.....धनुस्(N.)nom.sing., (धन्-उसि) , धन्-to make a sound 1P anit
a bow
शरः.....शरः (M.)nom.sing., (शृ-अच्) शृ-to kill.to pierce 9Pset
an arrow
आत्मा.....आत्मन् (M.)nom.sing., (अत्-मनिन् उणा.सू.४.१५२), अत्-to go constantly 1Pset
self
ब्रह्म.....ब्रह्म (N.) nom.sing.
Brahman
लक्ष्यम्.....(ad.) लक्ष्यम्(N.)acc.sing., (लक्ष्-ण्यत्), लक्ष्-to observe 1A set
target
उच्यते.....वच् 3rd.per.sing.pass.कर्मणि, वच्- to speak 2P anit
is being said
अप्रमत्तेन.....(ad.) अप्रमत्तः (M.)instr.sing., (न प्रमत्तः-नञ् तत्पु.), (प्र-मद्-क्त), मद्-to be glad 4P set
without unerring,unswerving
वेद्धव्यम्.....(ad.) वेद्धव्यम्(N.)nom.sing, (विध्-तव्यत्), विध्-to pierce 6P set
to be penetrated
शरवत्.....indeclinable,(शर-वत्) तेन तुल्यं क्रिया चेद्वतिः।५.१.११५
like an arrow

तन्मयः.....(ad.) तन्मयः(M.)nom.sing.,(तस्य मयः ,) मयट् वैतयोः भाषायां अभक्ष्याच्छादनयोः।४.३.१४३
one with that
भवेत्.....भू 3rd.per.sing.poten.moodविधि लिङ्ग,भू- to be 1P set
one should become

'Omkar', is a bow and indeed Atma who obtains in the individual, appears in the mind, is an arrow. Without unerring and through one pointedness and having dispassion for wordly objects(everywhere), one should target Brahman; which is in the form of the result of the nature of oneness. This is said by the knowers of Veda. One should be identified with that after hitting the mark. One should bring about oneness with refernce to Akshar, which is not subject to any destruction by eleminating the ideas of body, mind etc., just as the aim of the arrow with its target.

**यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैः सर्वैः ।**
**तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुः ॥५॥**

अन्वयः

यस्मिन्(अक्षरे), द्यौः, पृथिवी, अन्तरिक्षं च ओतं(समर्पितम्)। मनः, प्राणैः सह सर्वैः(करणैः) च(ओतम्)।(हे शिष्याः! यूयं), तमेव, एकं आत्मानं(प्रत्यक्स्वरूपं), जानथ(जानीथ)। (ज्ञात्वा), अन्याः वाचः(अपरविद्यारूपाः), विमुञ्चथ(मुञ्चत,परित्यजत)। (यस्मात्), अमृतस्य(मोक्षस्य), एषः सेतुः(मोक्षस्य प्राप्तये सेतुरिव सेतुः)।

यस्मिन्.....(re.pro.) यद्(N.)loc.sing.
in which
द्यौः..... द्यौः (F.)nom.sing., (द्युत्-डो) द्युत्-to shine 1A set
heaven
पृथिवी.....पृथिवी(F.)nom.sing., (प्रथ्-षिंवन् ,संप्रसारणम्), प्रथ्-to become famous 10Uset
the earth
अन्तरिक्षम्.....अन्तरिक्षम् (N.)nom.sing.(अन्तः स्वर्गपृथिव्योर्मध्ये ईक्ष्यते-),
(अन्तर्-ईक्ष-घञ्, पृषो.ह्रस्वः वा) ईक्ष्-to see 1A set
inter space
ओतम्.....(ad.) ओतम्(N.)nom.sing., (आ-वे-क्त), वे-to weave 1P anit
woven
मनः.....मनस् (N.)nom.sing., (मन्-असुन्) मन्-to think 4A
mind
सह.....indeclinable
along with
प्राणैः.....प्राणः(M.)instr.pl. , (प्र-अन्-अच् or घञ् ) अन्-to breath 2P
Pranas, sense organs
सर्वैः.....(demo.pro.) सर्व (M.)instr.pl.
with all
तम्.....(demo.pro.) तद् (N.)acc.sing.
with all
एकम्.....(ad.) एकः(M.)acc.sing.,(इ-कन्)
one
जानथ.....छान्दसम् जानीथ ज्ञा-2nd.per.pre.ten.pl.लट्, ज्ञा- to know 9P anit
you all know

आत्मानम्.....आत्मन् (M.)acc.sing., (अत्-मनिन् उणा.सू.४.१५२), अत्-to go constantly 1Pset
to self
अन्याः.....(ad.) अन्या (F.)nom.pl.
other
वाचः.....वाक् (F.)nom.pl., (वच्-क्विप्) वच्-to speak 2P
talks
विमुञ्चथ.....वि-मुञ्च् 2nd.per.pl.pre.ten.लट्, वि-मुञ्च्- to give up 6P anit
you all give up
अमृतस्य.....(ad.) अमृतम् (N.)gen.sing.
of the moksa
एष..... (demo.pro.) एतत्(N.)nom.sing.,(इ-अदि-तुँ क्) इ-to go 2P
this
सेतुः.....सेतुः (M.)nom.sing.,(सि-तुन्, उणा.सू.१.६९) सि-to bind 5U anit
a bridge

In which Aksar Brahman, the earth, the heaven and the inter space are woven, the mind and Prana along with all organs are also woven. O disciples! May you know that Atma as ones own self. Having known this Atma, others talk in terms of inferior knowledge, you all give up, because this is the bridge of understanding for Moksa.

**अरा इव रथनाभौ संहता यत्र नाड्यः स एषोऽन्तश्चरते बहुधा जायमानः ।**
**ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात् ॥६॥**

अन्वयः

(यथा), अराः रथनाभौ संहताः(समर्पिताः), (तद्वत्), यत्र(यस्मिन् हृदये देहव्यापिन्यः)नाड्यः, (समर्पिताः), सः एषः(आत्मा), अन्तः(तस्मिन् हृदये), चरते(चरति,वर्तते)। (कीदृशः सः), बहुधा(क्रुद्धहर्षादिरूपेणानेकधा) जायमानः(इव जायमानः)। (हे शिष्याः यूयं), (तं)आत्मानं ओमित्येव(प्रणवालम्बेन), ध्यायथ(चिन्तयत)। (आचार्यः शिष्येभ्यः उपदिशति)।(हे शिष्याः), पाराय(परकूलाय ), (अविद्या)तमसः परस्तात्, वः(युष्मभ्यं), स्वस्ति(निर्विघ्नमस्तु)।('अविद्यारहितब्रह्मात्मस्वरूपागमनाय स्वस्ति अस्तु'-इत्यर्थः)।

अराः.....अरः (M.)nom.pl., (इर्यति गच्छति अनेन-इति), (ऋ-अच्) ऋ-to go 1Pnit
spokes
रथनाभौ.....(ad.) रथनाभिः (M.)loc.sing.,(रथस्य नाभिः - ष.तत्पु.)
on the hub of the chariot
संहताः.....(ad.) संहता (F.)nom.pl., (सम्-हन्-क्त) सं-हन्- to acquir 2P anit
are fixed
यत्र.....indeclinable
in which
नाड्यः.....नाडी (F.)nom.pl., (नड-णिच्-इन्, नाडि-ङीष्)
nerves
सः.....(demo.pro.) तत्(N.)nom.sing.
that
एष..... ..(demo.pro.) एतत्(N.)nom.sing.
this
अन्तर्.....indeclinable, (अम्-अरन्, तुडागमश्च)
in side

चरते.....छान्दसम्- चरति 3rd.per.sing.pre.ten.लट्,चर्-to move 1P set
moves
बहुधा.....indeclinable, (बहु-धाच्)
variously
जायमानः.....(ad.) जायमानः (M.)nom.sing., (जन्-शानच्) जन्-to be born, appear 4A anit
appearing
ॐ.....indeclinable, (अव्-मन्, उठ्, गुणः) अव्- to protect 1P set
Om
ध्यायथ.....ध्यै -2nd.per..pl pre.ten..लट्, ध्यै- to meditate 1P anit
may you all meditate.
आत्मानम्.....आत्मन् (M.)acc.sing., (अत्-मनिन् उणा.सू.४.१५२) अत्-to go constantly 1Pset
the Self
स्वस्ति.....indeclinable, (सु-अस्-क्तिच्, वा अस्तीति विभक्तिरूपकं अव्ययम्, प्रादि.स.)
let it be good
वः.....(per.pro.) short form of युष्मभ्यम् युष्मद् dat.pl.
for you.
पाराय.....(ad.) पारः (M.)dat.sing., (पॄ-भावे अप्, कर्तरि अच् वा)
for the other side
तमसः.....तमस् (N.)alb.sing., (तम्-असुन्) तम्-to be suffocated 4P set
from darkness
परस्तात्.....indeclinable, (पर-अस्ताति)
beyond, from

Just as spokes are fixed on the hub of the chariot, like those nerves which are spread over the body are fixed in the heart, Atma moves, exsists within the heart. How is that? He is appearing as though in multiform in the form of anger, elevation and etc. O Disciples! May you meditate upon that Atma with the help of Om. Thus the teacher teaches the students. O Disciples! Let there be no hindarance for you for crossing the other shore from darkness which is ignorance. The meaning is- "Let there be auspicious for recognizing the true nature of Atma as Brahman bereft of ignorance".

**यः सर्वज्ञः सर्वविद्यस्यैष महिमा भुवि दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः ॥**
**मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय ।**
**तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाति ॥७॥**

अन्वयः

यः(परमात्मा), सर्वज्ञः(सामान्यरूपेण सर्ववस्तुज्ञानवान्), सर्ववित्(विशेषरूपेण सर्वस्य वेत्ता), यस्य(परमात्मनः), एषः महिमा (जगत्-सृष्ट्यादिरूपः), भुवि(भूलोके प्रसिद्धः), (सः)एषः आत्मा, दिव्ये ब्रह्मपुरे(द्योतनवति सर्वबोद्धप्रत्ययद्योतके, चैतन्यस्वरूपेण-नित्य-अभिव्यक्तत्वात्), व्योम्नि(हृदयपुण्डरिके) प्रतिष्ठितः(इवोपलभ्यते)। (सर्वगतस्य आत्मनः वस्तुतः गतिः आगतिः न सम्भवति)। (तत्रस्थः आत्मा), मनोमयः(मनोवृत्तिभिः विभाव्यते), प्राणशरीरनेता(स्थूलदेहात् स्थूलदेहान्तरं प्रापकः), हृदयं सन्निधाय(स्थापयित्वा), अन्ने(अन्नमये स्थूलदेहे), प्रतिष्ठितः(अवतिष्ठतः)। यत् (आत्मतत्वं), आनन्दरूपं अमृतं विभाति(विशेषेण स्वात्मनि एव भाति)। धीराः(विवेकिनः), तद्विज्ञानेन(तस्य आत्मनः शास्त्राचार्योपदेशजनितज्ञानेन, शमदमध्यानवैराग्योद्भूतेन), परिपश्यन्ति(विजानन्ति)।

यः.....(re.pro.) यद् (M.)nom.sing.
one who
सर्वज्ञः.....(ad.) सर्वज्ञः (N.) nom.sing.,(सर्वं जानाति -उपपद तत्पु.)
one who knows in general (contextually)
सर्ववित्.....(ad.) सर्ववित् (M.)nom.sing.,(सर्वं वेत्ति-उपपद तत्पु.)
one who knows in detail
यस्य.....(re.pro.) यत् (M.)gen.sing.
one whose
एष..... (demo.pro.) एतत्(N.)nom.sing.
this
महिमा.....महिमन् M.)nom.sing., (महत्-इमनिच्, टिलोपः)
glory
भुवि.....भूः (F.)loc.sing., (भू-क्विप्)
in the mother earth
दिव्ये.....दिव्यः (M.)loc.sing., (दिवि भव, दिव्-यत्) दिव्-to shine 4P anit
heaven, brilliant
ब्रह्मपुरे.....(ad.) ब्रह्मपुरः (M.)loc.sing., (ब्रह्मणः पुरः-षष्ठी.तत्पु.)
contextually, in the mind
व्योम्नि.....व्योमन् (N.)loc.sing., (व्ये-मनिन्, पृषो.) व्ये-to cover 1U
in the space
आत्मा.....आत्मन् (M.)nom.sing., (अत्-मनिन् उणा.सू.४.१५२), अत्-to go constantly 1Pset
Self
प्रतिष्ठितः.....(ad.) प्रतिष्ठितः (M.)nom.sing., (प्रत्-स्था-क्त) स्था-to stand 1P anit
abode
मनोमयः..... (ad.) मनोमयः(M.)nom.sing., (मनस्-मयट्)
conditioned by mind
प्राणशरीरनेता.....(ad.) प्राणशरीरनेतृ (M.)nom.sing.,(प्राणं च शरीरं च-समा.द्व., प्राणशरीरस्य नेता-षष्ठी.तत्पु.)
one who guides prana and body
अन्ने.....अन्नम् (N.)loc.sing.,(अद्-क्त,अन्-नन् वा), (अद्यते भुज्यते च एव भूतैः,अत्ति च) अद्-to eat 2P anit
in the food
हृदयम्.....हृदयम् (N.)nom.sing., (हृ-कयन्, दुक् आगमनः) हृ-to carry off 3P anit
intellect
सन्निधाय.....ind. past participle, (सम्-नि-धा-ल्यप्) धा-to sustain 3P anit
having placed
तद्विज्ञानेन.....(ad.) तद्विज्ञानम् (N.)instr.sing., (तस्य विज्ञानम्- षष्ठी.तत्पु.)
because of that knowledge
परिपश्यन्ति.....परि-दृश् 3rd.per.pl.pre.ten.लट्, परि-दृश्- to understand properly1Panit
they understand properly
धीराः.....धीरः(M.)nom.sing.,(धी-रा-क)
wise men
आनन्दरूपम्.....(ad.) आनन्दरूपम् (N.)acc,sing., (आनन्दं रूपं यस्य तत्-ब.व्री.)
form of the hapiness

अमृतम्.....(ad.) अमृतम् (N.)acc.sing.,(न मृतम्-नञ् तत्पु.)
which is not subject to death
विभाति.....वि-भा 3rd.per.sing.pre.ten.लट्, वि-भा-to appear,shine 2P anit
it shines

The Lord, who knows all things in general and who knows all things in detail, for Him, the glory in the form of universe is well known in the earth.This Atma is as though available in the heart, because of appearing in the form of conciousness with reference to all cognitions. In reality, Atma who is all pervading, coming and going does not happen. Having fixed in the heart, residing in the gross body, Atma reveals through cognitions of mind, to the one who obtains different bodies. The truth of Atma shines as ones own self. The discriminating people understand this, through the knowledge which is born out the teaching of teachers and scriptures and arising through dispasssion, meditation and control of outer and inner sense organs.

**भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशया : ।**
**क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥८॥**

अन्वयः

(परमात्मज्ञानस्य इदं फलं अभिधीयते)। तस्मिन्(सर्वेज्ञे, असंसारिणि), परावरे(कारणात्मा च कार्यात्मा च), दृष्टे सति (तस्मिन्परावरः साक्षादहमस्मीति')। अस्य(विच्छिन्नसंशयस्य पुरुषस्य), हृदयग्रन्थिः(अविद्यावासनाप्रचयः बुद्ध्याश्रितः कामः), भिद्यते(विनाशं आयाति)। सर्वसंशयाः(सर्वज्ञेयविषयाः), छिद्यन्ते(विच्छेदं आयाति)। कर्माणि(अनारब्धफलानि, सञ्चितागामि -रूपाणि) क्षीयन्ते(नश्यन्ति)।

भिद्यते..... भिद् 3rd .per.sing.pass. कर्म कर्तरि प्र., भिद्- to break down, to cut 7U anit
is being cut
हृदयग्रन्थिः.....(ad.) हृदयग्रन्थिः (M.)nom.sing.,(हृदयस्य ग्रन्थिः-ष.तत्पु.)(हृ-कयन्, दुक् आगमः)ग्रन्थ्-to tie 1,9P
the knot of the heart
छिद्यन्ते.....छिद् 3rd .per.pl.pass. कर्म कर्तरि प्र., भिद्- to break down, to cut 7U anit
are being cut
सर्वसंशयाः.....(ad.) सर्वसंशयः(M.)nom.pl., (सर्व च असौ संशयः -क.धा.)
all doubts
क्षीयन्ते.....क्षि 3rd .per.pl.pass. कर्म कर्तरि प्र., क्षि- to break down, to cut 1P,5P anit
are being dissipated
अस्य.....(demo.pro.) इदम् (M.)gen.sing.
of that
कर्माणि.....कर्म (N.)nom.pl., (कर्म-मनिन्) कृ-to do 8U anit
all karmas
तस्मिन्.....(demo.pro.) तत् (M.)loc.sing.
in that
दृष्टे.....(ad.) दृश् (M.)loc.sing., (दृश्-क्त) दृश्-to see 1P anit
seen
परावरे.....(ad.) परावरम् (N.) nom.dual, (परं च अपरं च परावरे- इत्.द्व.)
one which is non-dual and Isvara

This result of knowledge of Bhagavan is being stated. When that all knowing and bereft of world, which is both non-dual and Isvara is recognized as oneself; for that person, the desire which resides in the intellect like a knot of the heart gets untied. All doubts with regards to all objects of cognitions being resolved, and

all karmas in the form of accumulated in one's account which are yet to be fructified gets dissipated.

**हिरण्यमये परे कोशे विरजं ब्रह्म निष्कलम् ।**
**यच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः ॥९॥**

अन्वयः

हिरण्यमये(ज्योतिर्मये), परे(बुद्धिविज्ञानप्रकाशे), कोशे(आत्मस्वरूपोपलब्धिस्थानत्वात् तस्मिन्कोशे, बुद्धौ), आत्मविदः(आत्म-प्रत्ययानुसारिणः), तत्(ब्रह्म), विदुः(विजानन्ति)। (ते किं जानन्ति-तत्र आह)। यत् ब्रह्म(सर्वमहत्त्वात्), तत् विरजं (अविद्यारजो-मलवर्जितं), निष्कलं(निरवयवं), शुभ्रं(विरजत्वात्, निष्कलत्वात् एव), ज्योतिषां ज्योतिः(सर्वप्रकाशकानामादित्यानां अपि ज्योतिः, आत्मज्योतिः)। (कोशे बुद्धौ, आत्मविदः, तत् ब्रह्म, विदुः)।

हिरण्यमये.....(ad.) हिरण्मयः(M.)loc.sing,(हिरण-मयट्)
in the bright

परे.....(ad.) पर (M.)loc.sing.,(पॄ-अप्,कर्तरि अच् वा) पॄ-to fill 3P anit
in the exalted

कोशे.....कोशः (M.)loc.sing.,(कुश्-घञ्,अच् वा) कुश्-to speak 10U set
in the sheath

विरजम्.....(ad.) विरजम् (N.)nom.sing.,(विगतम् रजः यस्मात्- प्रादि.स.)
which is free from taint

निष्कलम्.....(ad.) निष्कलम् (N.)nom.sing.,(निर्गताः कलाः यस्मात्- प्रादि.स.)
one who is without parts

शुभ्रम्.....(ad.) शुभ्रम् (N.)nom.sing.,(शुभ्-रक्) शुभ्- to shine 1Pset,1Aset,6Pset
pure

ज्योतिषाम्.....ज्योतिः (N.)gen.pl.,(द्योतते द्युतते वा- द्युत्-इसुन्, दस्य जादेशः),द्युत्-to shine 1A set
among lights

ज्योतिः..... ज्योतिः (N.)nom.sing.
light

आत्मविदः.....(ad.) आत्मवित् (M.)nom.pl.,(आत्मानं वेत्ति- उप.तत्पु.स.)
the knowers of Self

विदुः.....विद् 3rd.per.pl.pre.ten. लट्,विद्- to know 2Pset
they know

In the intellect which is as though the sheath, being the location where the nature of Self is understood, which is exalted because of revealing the knowledge, in that intellect, the knowers of the Self, one whose nature is recognized as themselves, as a witness of every cognition. They know that Brahman. What do they know? They know that Brahman, as being the greatest, free from taints like ignorance, and as having no parts. It is pure, illuminator of all lights, being self-effulgent.

**न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः ।**
**तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥ १०॥**

अन्वयः

तत्र(तस्मिन्स्वात्मभूते), सूर्यः(सर्वावभासकोऽपि), न भाति, चन्द्रतारकं (न भाति), इमाः विद्युतः न भान्ति। कुतः अयं अग्निः! तमेव(परमेश्वरं चैतन्यं स्वतः भारूपत्वात्)भान्तं, सर्वं अनुभाति(अनुदीप्यते)। सर्वमिदं(सूर्यादिकं), तस्य(स्वप्रकाशरूपस्य), भासा(दीप्त्या एव) विभाति। (सर्वं अनुभाति, प्रकाशाश्रयो भवति, न स्वप्रकाशवान् )।

तत्र……indeclinable
in that
सूर्यः…… सूर्यः (M.)gen.sing., (सृ-क्यप्) सृ- to go 1P Anit
the Sun
भाति……भा 3rd.per.sing.pre.ten.लट्, भा-to appear,shine 2P anit
it shines
चन्द्रतारकम्……(ad.) चन्द्रतारकम् (N.)nom.sing., (चन्द्रः च तारकं च-समा.द्व.स.)(चन्द्-णिच्-रक्)(तॄ-णिच्-ण्वुल्)
moon and star
इमाः……(demo.pro.) इदम् (F.)nom.pl.
these
विद्युतः……विद्युत् (F.)nom.pl., (विशेषेण द्योतते-) (वि-द्युत्-क्विप्) द्युत्-to shine 1A set
of lightening
भान्ति……भा 3rd.per.pl.pre.ten.लट्, भा- to shine 2P anit
they shine
कुतः……indeclinale, (किम्-तसिल्)
how do
अयम्……(demo.pro.) इदम् (M.)nom.sing.
this
अग्निः……अग्निः (M.)nom.sing.,(अङ्गति उर्ध्वं गच्छति अङ्ग-नि नलोपः उणा.सू.४.५०)
Fire Devata
तम्……(demo.pro.) तद् (N.)acc.sing.
with all
एव……indeclinable
indeed
भान्तम्……(ad.) भान्तम् (M).acc.sing., (भा-शतृ)
shining
अनुभाति……अनु-भा 3rd.per.sing.pre.ten.लट्,अनु-भा-to appear,shine 2P anit
it shines according to
सर्वम्……(demo.pro.) सर्वम्(N.)nom.sing., (सृतं अनेन -)
everything
तस्य……(demo.pro.) तत् (M.)gen.sing.
of this
भासा……भास् (F.)instr.sing., (भास्-क्विप्) भास्-to shine 1A set
because of shining
सर्वम्……(demo.pro.) सर्वम्(N.)nom.sing.,(सृतं अनेन -)
everything
इदम्…… (demo.pro.) इदम्(N.)nom.sing.
this
विभाति……वि-भा 3rd.per.sing.pre.ten.लट्, वि-भा-to appear, shine 2P anit
it shines

In the Self, the Sun, which is the illuminator of all, does not shine there, the moon and the stars do not shine, nor do the flashes of lightening shine there. How can this fire do so? Being the nature of self

illuminating that conciousness shines and all shine in accordance. All these shine because of that self illuminator. In short all these shine in accordance, they do not have self-illuminating power.

**ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण ।**
**अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥११॥**

अन्वयः

पुरस्तात्(अग्रे), इदं अमृतं ब्रह्म एव, पश्चात्(पृष्ठतःअपि) ब्रह्म, दक्षिणतः उत्तरेण च ब्रह्म, अधः च उर्ध्वं च ब्रह्म प्रसृतम्।(किं बहुना! इदं सर्वं विश्वं(दृश्यमानं), वरिष्ठं(वरतमं ब्रह्म एव)। (अब्रह्मप्रत्ययः सर्वः अविद्यामात्रः, सर्पप्रत्ययः रज्ज्वां इव)।

ब्रह्म.....ब्रह्म (N.) nom.sing.
Brahman

इदम्..... (demo.pro.) इदम्(N.)nom.sing.
this

अमृतम्.....(ad.) अमृतम् (N.)acc.sing.,(न मृतम्-नञ् तत्पु.)
which is not subject to death

पुरस्तात्.....indeclinable, (पूर्व-अस्ताति, पुर् आदेशः)
beyond, from

पश्चात्.....indeclinable, (अपर-अति,पश्चभावः)
from behind

दक्षिणतः.....indeclinable, (दक्षिण-तसिल्)
on the right

उत्तरेण.....indeclinable, (उत्तर-एनप्)
on the left

अधः.....indeclinable,(अधर-असि, अधरशब्दस्य स्थाने अधादेशः)
below

उर्ध्वम्.....(ad.) ऊर्ध्वम् (N.)nom.sing., (उद्-हा-ड पृषो.उर् आदेशः)
above

प्रसृतम्.....(ad.) ऊर्ध्वम् (N.)nom.sing.,(प्र-सृ-क्त) सृ- to go 1P anit
extended

विश्वम्.....(ad.) विश्वम् (N.)nom.sing., (विश्-व) विश्- to enter 6P
the universe

वरिष्ठम्.....(ad.) वरिष्ठम्(N.)nom.sing.,(अयमेषामतिशयेन वरः उरुः वा, उरु-इष्ठन्, वरादेशः)
most exalted

Brahman which is not subject to death, is in the front, at the back, on the right and also in the left, and is spread out. What more!! All this universe is Brahman alone which is exalted. All ideas of non-Brahman is nothing but ignorance, like the snake cognition on a rope.

******

**इति मुण्डकोपनिषदि द्वितीयमुण्डके द्वितीयः खण्डः**

******

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।**
**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न्यो अभिचाकशीती ॥१॥**

अन्वयः

द्वा(द्वौ),सुपर्णा(सुपर्णौ, पक्षिणौ), सयुजा(सयुजौ, सर्वदा युक्तौ), सखाया(सखायौ, चिन्मयत्वेन समानरूपौ), समानं(अविशेषमेकं), वृक्षं(उच्छेदसामान्याद् वृक्षतुल्यं शरीरं), परिषस्वजाते(परिष्वक्तवन्तौ)। तयोः(परिष्वक्तयोः जीवेशयोर्मध्ये), अन्यः(ईशात् भिन्नः कल्पितः जीवः), पिप्पलं(सुखदुःखात्मकं कर्मफलं), स्वादु(आस्वादरूपं) अत्ति(भक्षयति अविवेकतः)। अन्यः(जीवाद्विलक्षणः ईश्वरः सर्वज्ञः), अनश्नन्(अभुञ्जान् सन्), अभिचाकशीति(केवलं पश्यति, दर्शनमात्रं हि तस्य प्रेरयितृत्वम्)।

द्वा.....छान्दसम्.द्वौ द्वि(M.)nom.dual (नित्यं द्विवचनम्)
two birds

सुपर्णा.....छान्दसम्..सुपर्णौ सुपर्णः (M.)nom.dual,(सुष्ठु पर्णं यस्य सः- प्रादि स.)
(contextually) entities who are well related

सयुजा.....छान्दसम्..सयुजौ सयुजः (M.)nom.dual, (सह एव सर्वदा युक्तौ )
two well associated

सखाया.....छान्दसम्-सखायौ सखायः (M.)nom.dual, (समान ख्यायते लोके)
have a similar name

समानम्.....(ad.) समानम् (M.)acc.sing.,(सम्-अन्-अण्)
same

वृक्षम्.....वृक्षः (M.)acc.sing., (व्रश्च्-क्स्) व्रश्च् -to cut 6P vet
a tree

परिषस्वजाते.....परि-स्वज् 3rd.per.dual perfect. लिट्, परि-स्वज्- to embrace 1A anit
hugged

तयोः.....(demo.pro.) तत् (M.)gen.dual.
among thses two

अन्यः.....(ad.) अन्यः (M.)nom.sing.
other

पिप्पलम्.....पिप्पलः (M.)accc.sing., (पा-अलच् पृषो.) पा-to drink 1P anit
(contextually) fruit

स्वादु.....(ad.) स्वादु (M.)acc.sing., (स्वद्-उण्)
tasty

अत्ति.....अद् 3rd.per.sing. pre.ten.लट्, अद्--to eat 2P anit
eats

अनश्नन्.....(ad.) अनश्नन् (M.)nom.sing., (न अश्नन्- नञ् तत्पु.) (अश्-शतृ)
without eating

अभिचाकशीति.....अभि-काश्-यङ् 3rd.per.sing.pre.ten.लट्, अभि-काश्-यङ्- to keep on looking (frequentative)
keeps on looking

Two birds that are ever associated and having same form because of the nature of conciousness, cling to each other, locus of avaibility being same tree, which is available for cutting i.e. tree analogy is given to the body. Among both which are embraced; one of them which is as though separate from Isvara and considers as a limited being because of indiscriminative power eats tasty fruit in the form of happiness and sorrow according to his/her karmas. While the other one who is Isvara, omniscient being uneaten merely watches. His nature is being a mere witness.

**समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः ।**
**जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः॥२॥**

अन्वय:

समाने वृक्षे(वृक्षतुल्यशरीरे), पुरुषः(कर्मफलभोक्ता), निमग्नः(देहेन सह तादात्म्याभिमानमापन्नः)। (अतः), मुह्यमानः(अनेकैः अविवेकतया नानाविधचिन्तां आपद्यमानः), अनीशया(दीनभावः, न कस्यचित् समर्थोऽहं इति), शोचति(संतप्यते)। यदा (यस्मिन्काले जुष्टं(योगिभिः कर्मिभिः सेवितं), अन्यं(शरीरोपाधेः विलक्षणात्), ईशं(असंसारिणं), पश्यति(ईश्वरोऽहं सर्वस्य आत्मा इति अभेदेन जानाति), अस्य(ईश्वरस्य), महिमानं(जगद्रुपं अस्य एव मम परमेश्वरस्य)इति (जानाति), (तदा), वीतशोकः(कृतकृत्यः भवति)।

समाने.....(ad.) समानम् (M.)loc.sing.
in similarity

वृक्षे.....वृक्षः (M.)loc.sing.
on the tree

पुरुषः.....पुरुषः (M.) nom. sing., पुरि देहे शेते इति पुरुषः, (पुर्-कुषन्), पुर्- to fill 4A, 10U
human being

निमग्नः.....(ad.) निमग्नः (M.)nom.sing., (नि-मस्ज्-क्त) मस्ज्-to sink 6P anit
drowned

अनीशया.....अनीशा (F.)instr.sing.,(न ईशा- नञ् तत्पु.)
through impotence, helplessly

शोचति.....शुच् 3rd.per.sing.pre.ten.लट्,शुच्- to grieve 1Pset
grieves

मुह्यमानः.....(ad.) मुह्यमानः (M.)nom.sing., (मुह्-यक्-शानच्), मुह्-to be deluded 4P anit
being worried

जुष्टम्.....(ad.) जुष्टः(M.)acc.sing., (जुष्-क्त) जुष्-to like 6Pset
is adored

यदा.....indeclinable, (यत् काले दाच्), सर्वैकान्य-किं-यत्-तदः काले दा।५.३.१५
when

पश्यति.....दृश् 3rd.per.sing.pre.ten.लट्, दृश्- to see 1P anit
sees

ईशम्.....(ad.) ईशः (M.)acc.sing., (ईश्-क) ईश्-to rule 2A set
the Lord, one who rules

महिमानम्.....महिमन् (M.)acc.sing., (महत्-इमनिच्, टिलोपः) पृथ्वादिभ्य इमनिच् वा।५.१.१२२
the glory.

वीतशोकः.....(ad.) वीतशोकः (M.)nom.sing., (विगतः शोकः यस्मात्- प्रादि.ब.व्री.)
one from whom sorrow has gone, free from sorrow

In the body which is compared to the tree, the individual is sunken owing to identification with the body. Being deluded by different worries, ' I am not capable of anything', like helplessly he grieves. At that time, being served by Karma and meditation, one understands Isvara, is adorable, is devoid any worldly limitations and is not separate from me, 'I am Isvara', he knows without any doubt and knows the glory of Isvara than individual becomes free from sorrow.

**यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।**
**तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥३॥**

अन्वयः

यदा(यस्मिन्काले), पश्यः(ज्ञानयोग्योऽधिकारी), रुक्मवर्णं(स्वयंज्योतिस्वभावं), कर्तारं(जगदुत्पादकं), ईशं(नियन्तारं), पुरुषं(पूर्णं), ब्रह्मयोनिं(ब्रह्मणः वापरस्य योनिं-कारणं), पश्यते(पश्यति आत्मत्वेन विजानाति)। तदा(तस्मिन्काले), विद्वान्(आत्मज्ञानी),

पुण्यपापे(कर्मणी) विधूय(दग्ध्वा), निरञ्जनः(निर्लेपः सन्), परमं(प्रकृष्टं) साम्यं(अद्वयलक्षणं), उपैति(प्राप्नोति)।

यदा.....indeclinable
when
पश्यः.....(ad.) पश्यः (N.)nom.sing., (दृश्-श) (पश्यति इति पश्यः) पा-घ्रा-ध्मा-धेड्-दृशः शः।३.१.१३७ दृश्- to see 1P
one who sees
पश्यते.....छान्दसं -पश्यति...दृश् 3rd.per.sing.pre.ten.लट्, दृश्- to see 1P anit
sees
रुक्मवर्णम्.....(ad.) रुक्मवर्णम् (M.)acc.sing., (रुक्मं ज्योतिः स्वभावं यस्य सः- ब.व्री.)
self-illumined
कर्तारम्.....(ad.) कर्तु (M.)acc.sing., (कृ-तृच)
the creator
ईशम्.....(ad.) ईशः (M.)acc.sing.
one who rules
पुरुषम्.....पुरुषः (M.) acc. sing.
human being
ब्रह्मयोनिम्.....(ad.) ब्रह्मयोनिः (M.)acc.sing., (ब्रह्म च तत् योनिः- क.धा., वा ब्रह्मणः अपरस्य योनिः-ष.तत्पु.)
the source of Hiranyagarbha
तदा.....indeclinable, (तत् काले दाच्) सर्वैकान्य-किं-यत्-तदः काले दा।५.३.१५
then
विद्वान्.....विद्वस्(M.)nom.sing., (विद्-क्वसु) विद् -to know 2P set
knower
पुण्यपापे.....(ad.) पुण्यपापम् (N.)acc.dual, (पुण्यं च पापं च -समा.द्व.)
punya and papa
विधूय.....indeclinable past part.,(वि-धु-ल्यप्) धू-to shake 5U,9U(vet),6P,10U(set)
having shaken off
निरञ्जनः.....(ad.) निरञ्जनः (M.)nom.sing.,(अञ्जनं गतः यस्मात्- प्रादि.ब.व्री.)
taintless
परमम्.....(ad.) परमम्(N.)nom.sing., (परं परत्वं माति-क तारा.)
exalted
साम्यम्.....(ad.) साम्यम् (M.)acc.sing., (सम्-ष्यञ्)
the nature of the oneness
उपैति.....उप-इ 3rd.per.sing.pre.ten.लट्,उप-इ-to attain 2P set
one who attains

When the seer, one who is qualified for knowledge sees the Self, the Purusa who is self illumined, one who is the ruler, one who is the cause of Hiranyagarbha- then the knower of the Self having burnt the Karma in the form of Punya and Papa, being taintless, he attains exalted eqanimity in the form of non dual.

**प्राणो ह्येष यः सर्वभूतैर्विभाति विजानन्विद्वान्भवते नातिवादी ।**
**आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः ॥४॥**

अन्वयः

एषः प्राणः(प्राणोपाधिकः ईश्वरः), सर्वभूतैः(इत्थं भूते तृतीया, ब्रह्मास्तंबपर्यन्तं), विभाति(नानाविधः दीप्यते)। यः विद्वान् विजानन् भवते(भवति),अतिवादी(आत्मा अतिरिक्तान् अन्यान् वदितुं शीलः अस्य) न भवति। (किञ्च), एषःआत्मक्रीडः(आत्मनि क्रीडनं

यस्य सः), आत्मरतिः(आत्मनि रतिः यस्य सः), क्रियावान्(ज्ञानध्यानवैराग्यादि क्रियाः अस्य अस्ति),ब्रह्मविदां(मध्ये), वरिष्ठं (भवति)।

प्राणः.....प्राणः(M.)nom.sing., (प्र-अन्-अच् or घञ् ) अन्-to breath 2P
Prana

एषः.....(demo.pro.) एतद् (M.)nom.sing.
this

यः.....(rel.pro.) यत्(M.)nom.sing.
one who

सर्वभूतैः.....(ad.) सर्वभूतः(M.)instr.pl. (इत्थं भूते तृतीया), (सर्व च असौ भूतः- क.धा.)
in the form of all beings

विभाति.....वि-भा 3rd.per.sing.pre.ten.लट्,वि-भा-to appear,shine 2P anit
it shines

विजानन्.....(ad.) विजानत् (M.)nom.sing., (वि-ज्ञा-शतृ) ज्ञा-to know 9P anit
knowing well

विद्वान्.....विद्वस् (M.)nom.sing., (विद्-क्वसु) विद् -to know 2P set
knower

भवते.....छान्दसं-भवति -भू 3rd.per.sing.pre.ten.लट्,भू-to be 1P set
becomes

अतिवादी.....(ad.) अतिवादिन् (M.)nom.sing., (अन्यान् वदितुं शीलं अस्य-)
one whose nature is to speak anything

आत्मक्रीडः.....(ad.) आत्मक्रीडः (M.)nom.sing., (आत्मनि क्रीडा यस्य सः- स. ब.व्री.)
one who revels in the Self

आत्मरतिः..... (ad.) आत्मरतिः (M.)nom.sing., (आत्मनि रतिः यस्य सः- स.ब.व्री.)
one who delights in the Self

क्रियावान्.....(ad.) क्रियावान् (M.)nom.sing.,(क्रिया अस्य अस्ति-) (क्रिया-वतुप्) मादुपधाया..... वोः अयवादिभ्यः।८.२.९
one who does action

ब्रह्मविदाम्.....(ad.) ब्रह्मवित् (M.)gen.pl.,(ब्रह्म वेत्ति-प्रादि.ब.व्री.)
among the knowers of Brahman

वरिष्ठः.....(ad.) वरिष्ठः (N.)nom.sing.,(अयमेषामतिशयेन वरः उरुः वा, उरु-इष्ठन्, वरादेशः)
most exalted

This Isvara appears in the form of all beings. Knowing this, one becomes knower, he does not become one whose nature is to blabber other than 'Atma'. He revels in the Self, delights in the Self, puts effort with reference to knowledge, meditation, develops dispassion etc.This one is the exalted among the knowers of Brahman.

**सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम् ।**
**अन्तःशरीरे ज्योतिर्मयो हि शुभ्रः यं पश्यन्ति यतयः क्षीणदोषाः ॥५॥**

अन्वयः

एषः हि आत्मा लभ्यः(प्राप्तव्यः), (कैः साधनैः प्राप्तव्यः?), नित्यं सत्येन(अनृतत्यागेन लभ्यः), नित्यं तपसा(इन्द्रियमन एकाग्रतया लभ्यः), नित्यं सम्यग्ज्ञानेन(यथाभूतात्मदर्शनेन लभ्यः), नित्यं ब्रह्मचर्येण(मैथुन-असमाचारेण लभ्यः)। यतयः(संन्यासिनः) क्षीणदोषाः (क्षीणक्रोधादिचित्तमलाः), यं (आत्मानं), पश्यन्ति(उपलभन्ते)। (कः असौ आत्मा, कुत्र पश्यन्ति?), ज्योतिर्मयः(स्वयंज्योतिर्मयः), शुभ्रः(शुद्धः आत्मा), अन्तःशरीरे(हृदयाकाशे, यतयः पश्यन्ति)।

सत्येन.....(ad.) सत्यम् (N.) instr.sing., (सते हितम् यत् )
through truth
लभ्यः.....(ad.) लभ्यः (M.)nom.sing., (लभ्-यत्) ,लभ्-to gain 1A anit
to be understood
तपसा.....तपः (N.)instr.sing., (तप्-असुन्) तप्- to be powerful 4A
through austerity
एषः.....(demo.pro.) एतद् (M.)nom.sing.
this
आत्मा.....आत्मन् (M.)nom.sing., (अत्-मनिन् उणा.सू.४.१५२), अत्-to go constantly 1Pset
Self
सम्यग्ज्ञानेन.....(ad.) सम्यग्ज्ञानम्(N.)instr.sing.,(सम्यग् च तत् ज्ञानम्- क.धा.)
with proper knowledge
ब्रह्मचर्येण.....ब्रह्मचर्यम् (N.)instr.sing.
with continence
नित्यम्.....(ad.) नित्यम्(N.)nom.sing., (नियमेन नियतं वा भवं- नि-त्यप्)
constant
अन्तःशरीरे.....अन्तःशरीरः (M.)loc.sing., (अन्तः- has inbuilt meaning of locative case)
inside the body
ज्योतिर्मयः.....(ad.) ज्योतिर्मयः(M.)nom.sing.,(ज्योतिः- मयट्)
self effulgent
शुभ्रः.....(ad.) शुभ्रम् (M.)nom.sing.,(शुभ्-रक्) शुभ्- to shine 1Pset,1Aset,6Pset
pure
पश्यन्ति.....दृश् 3rd.per.pl.pre.ten.लट्, दृश्- to see 1P anit
they see
यतयः.....यतिः (M.)nom.pl.
sannyasins
क्षीणदोषाः.....(ad.) क्षीणदोषः (M.)nom.pl., (दोषः क्षीणः येन- तृ.ब.व्री.)
impurity is perished by whom

This Atma is to be recognised. By which means is it to be recognised? By continuously following the truth, by continuous observation of austerities like concentration of the mind and sense organs, by having proper knowledge in terms of, that all beings are one and the same, by constant practice of continence, Atma is be understood. Sannyasis whose impurities like anger etc. have perished, recognize Atma. What is this Atma and where is it available? So, the answer is given, Atma is self-effulgent and pure in nature. Inside the body, in the intellect, sannyasins recognize this Atma.

**सत्यमेव जयते नानृतं सत्येन पन्था विततो देवयानः ।**
**येनाक्रमन्त्यृषयो ह्याप्तकामाः यत्र तत्सत्यस्य परमं निधानम् ॥६॥**

अन्वयः

सत्यं(सत्यवान्) एव जयति, न अनृतं(अनृतवान्)। सत्येन(यथाभूतकथनेन), पन्था(मार्गः), देवयानः(आख्यः), विततः(सातत्येन प्रवृत्तः)। येन(मार्गेण, पथा), ऋषयः(दर्शनवन्ताः),आप्तकामाः(विगततृष्णाः), आक्रमन्ति(आक्रमन्ते)। यत्र(यस्मिन्), तत्(परमार्थ-तत्त्वं) सत्यस्य(उत्तमसाधनस्य), परमं(प्रकृष्टं), निधानं(पुरुषार्थरूपेण निधीयते)।

सत्यम्.....(ad.) सत्यम् (N.) nom.sing.,(सते हितम् यत् )
truth

जयते..... छान्दसम्-जयति जि 3rd.per.sing.pre.ten.लट्, जि-to conquer 1P anit
conquers
अनृतम्.....(ad.) अनृतम्(N.)nom.sing.,(न ऋतम्- नञ् तत्पु.)
falsehood
सत्येन.....(ad.) सत्यम् (N.) instr.sing.
through truth
पन्था.....पथिन् (M.)nom.sing., (पथ् आधारे इनि) पथ्-to go1P set
a path
विततः.....(ad.) विततः (M.)nom.sing., (वि-तन्-क्त), तन्-to spread 5U set
laid
देवयानः.....देवयानः (M.)nom.sing.
name of the path
येन.....(re.pro.) यद् (M.)instr.sing.
by which
आक्रमन्ति.....छान्दसं आक्रमन्ते(पा.सू.-१.३.४०) आ-क्रम् 3rd.per.pl.pre.ten.लट्,आ-क्रम्- to ascend 1A set
they ascend
ऋषयः.....ऋषिः (M.)nom.pl., (ऋष्-इन्-कित्) ऋष्- to go 6Pset
seers
आप्तकामाः.....(ad.) आप्तकामः (N.)nom.pl., (कामः आप्तः येन-तृ.तत्पु.)
desires are fulfilled by whom
यत्र.....indeclinable
in which
तत्.....(demo.pro.) तद् (N.)nom.sing.
that
सत्यस्य.....(ad.) सत्यम् (N.)gen.sing.
through truth
परमम्.....(ad.) परमम्(N.)nom.sing., (परं परत्वं माति-क तारा.)
exalted
निधानम्.....(ad.) निधानम् (N.)nom.sing., (धा-लुट्) धा-to sustain 3P anit
treasure, abode

Indeed, the truthful person wins, not untruthfulness. By saying truth as it is the path called Devyana,which is spread, is laid. Through this path, the seers who are free from desires ascend, where that truth of reality which is exalted exists.

**बृहच्च तद्दिव्यमचिन्त्यरूपं सूक्ष्माच्च तत्सूक्ष्मतरं विभाति ।**
**दूरात्सुदूरे तदिहान्तिके च पश्यत्स्विहैव निहितं गुहायाम् ॥७॥**

अन्वयः

तत्(प्रकृतं ब्रह्म), बृहत्, दिव्यं(स्वयंप्रभं), अचिन्त्यरूपं(इन्द्रिय-अगोचरं), सूक्ष्मात्(आकाशात्) च तत्(सुक्ष्मतरं निरतिशयं हि सौक्ष्म्यं, सर्वकारणत्वात्) विभाति(विविधं आदित्यचन्द्रादिरूपेण भाति)। (असमाहितचित्तानां), दूरात् सुदूरे(प्रदेशे वर्तते), तत् (ब्रह्म), (समाहितचित्तानां), इह(शरीरे) अन्तिके(अत्यन्तं समीपं वर्तते)। पश्यत्सु(चेतनावत्सु प्राणिषु), इह(शरीरे), गुहायां(बुद्धौ), निहितं(स्थितम् ब्रह्मात्मरूपेण)।

बृहत्.....(ad.) बृहत् (N.)nom.sing.,(बृह्-अति)
the great
दिव्यम्.....दिव्यम् (N.)nom.sing.,(दिवि भव , दिव्-यत्) ,दिव्-to shine 4P anit
heaven, brilliant
अचिन्त्यम्.....(ad.) अचिन्त्यम्(N.)nom.sing.,(न चिन्त्यम्- नञ् तत्पु.)
not to be thought out
सूक्ष्मात्.....सूक्ष्मः (M.)alb.sing.,(सूक्-मन्, सुक् च नेट्)
than subtle
सूक्ष्मतरम्.....(ad.) सूक्ष्मतरम् (N.)nom.sing.,(सूक्ष्म-तरप्)
subtler
विभाति.....वि-भा 3rd.per.sing.pre.ten.लट्,वि-भा-to appear,shine 2P anit
it shines
दूरात्.....(ad.) दूरम् (N.)alb.sing.,(दुःखेन ईयते- दुर्-इण्-रक्, धातोः लोपः)
than the farthest
सुदूरे.....(ad.) सुदूरम् (N.)loc.sing.,(सुष्ठु दुरम्)
further away
इह.....indeclinable
here
अन्तिके.....(ad.) अन्तिकम् (N.)loc.sing.,(अन्तः सामीप्यम् अस्य अस्ति-अन्त-ठन्)
near
पश्यत्सु.....(ad.) पश्यन् (M.)loc.pl.,(दृश्-शतृ)
among sentient beings
निहितम्.....(ad) निहितम्(N.)nom.sing.,(नि-धा-क्त) दधातेः हिः।७.४.४२ धा- to bear 3P anit
resided
गुहायाम्.....गुहा (F..)loc.sing., (गुह्- टाप्) गुह्-to conceal 1U anit
in the heart

Brahman, which is under discussion is great, self effulgent and not the object of sense organs, is subtler than the subtlest like space, its subtleness is surpassing being the cause of all. It shines in the form of the Sun, Moon etc. The people whose minds are not gathered, for them 'It', exists farther away from the farthest. But for the people whose minds are gathered, Bramhan exists here, in the body very close, as though appears is the mind of sentient beings.

**न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा ।**
**ज्ञानप्रसादेन विशुद्धसत्त्वस्तत्स्तु तं पश्यते निष्कलं ध्यायमानः ॥८॥**

अन्वयः

(प्रकृतमात्मतत्त्वं), चक्षुषा(चक्षुरिन्द्रियेण), न गृह्यते(अरूपत्वात्), वाचा(वागिन्द्रियेणापि), न(गृह्यते), अन्यैः देवैः(इन्द्रियैः), तपसा (चान्द्रायणादिरूपेण), कर्मणा(अग्निहोत्रादिना) वा (न उपलभ्यते)। (केन तर्हि गृह्यते-अतः आह), ज्ञानप्रसादेन(बुद्धेः बाह्यविषय-रागादिषु रागादिमलनिराकरणेन), विशुद्धसत्वः(शुद्धान्तःकरणः ब्रह्मदर्शनयोग्यः)। ततः तु ध्यायमानः(एकाग्रेण मनसा चिन्तयन् सन्), तं निष्कलं(सर्वावयवभेदवर्जितं), पश्यते(पश्यति, उपलभ्यते)।

चक्षुषा.....चक्षुस् (N.)inst.sing., (चक्ष्-असि) चक्ष्-to speak 2A
with the eye
गृह्यते.....ग्रह् 3rd.per.sing.pass. कर्मणि, ग्रह्-to grasp 9P set
is comprehended

वाचा.....वाक्/वाग् (F.)instr.sing., (वच्-क्विप्) , वच्-to tell 2P
through speech
अन्यैः.....(ad.) अन्यः(M.)insrt.pl.
by others
देवैः.....देवः (M.) instr,pl.
by Devatas
तपसा.....तपः (N.)instr.sing., (तप्-असुन्) , तप्- to be powerful 4A
through austerity
कर्मणा.....कर्म (N.)instr.sing.
through karma
ज्ञानप्रसादेन.....(ad.) ज्ञानप्रसादः (M.)instr.sing.,(ज्ञानस्य चित्तस्य प्रसादः-ष.तत्पु.)
because of the blessing of the mind
विशुद्धसत्त्वः.....(ad.) विशुद्धसत्त्वः (M.)nom.sing.,(विशुद्धः सत्त्वः यस्य सः-ष.ब.व्री.)
one whose mind is pure
ततः.....indeclinable, (तद्-तसिल्)
after that
तम्.....(demo.pro.) तद् (M.)acc.sing.
to that
पश्यते.....छान्दसं - पश्यति...दृश् 3rd.per.sing.pre.ten.लट्, दृश्- to see 1P anit
sees
निष्कलम्.....(ad.) निष्कलम् (M.)acc.sing.,(निर्गता कला यस्मात्- प्रादि.ब.व्री.)
partless
ध्यायमानः.....(ad.) ध्यायमानः (M.)nom.sing.,(ध्यै-शानच्) ,ध्यै-to meditate 1P anit
while contemplating

The real nature of Atma is not comprehended by eye because of its formlessness, not by the organ of speech, not by any organ of senses, not by austerities like chandrayana etc, not by vedic karma like Agnihotra etc. 'Then how can it be comprehended?', therefore the Sruti says; because of the removal of all impurities in the form of likes and dislikes etc., a person has a pure mind, which is eligible for understanding Brahman. Then after, contemplating with concentrated mind one recognizes that the indivisible Brahman is free from all parts.

**एषोऽरणुरात्मा चेतसा वेदितव्यः यस्मिन्प्राणः पञ्चधा संविवेश ।**
**प्राणैश्चित्तं सर्वमोतं प्रजानां यस्मिन्विशुद्धे विभवत्येष आत्मा ॥९॥**

अन्वयः

यस्मिन्(शरीरे), प्राणः(प्राणवायुः), पञ्चधा(प्राणापानसमानादिभेदेन), संविवेश(सम्यक् प्रविष्टः), (तस्मिन्नेव शरीरे), एषः आत्मा चेतसा(केवलेन विशुद्धज्ञानेन), वेदितव्यः(ज्ञेयः)। प्रजानां सर्वं चित्तं प्राणैः(इन्द्रियैः सह), ओतं(व्याप्तं चैतन्यम्)। एषः आत्मा, यस्मिन्विशुद्धे(क्लेशमलादिरहिते अन्तःकरणे), विभवति(विशेषेण स्वेनात्मना विभवति)।

एषः.....(demo.pro.) एतद् (M.)nom.sing.
this
आत्मा.....आत्मन् (M.)nom.sing.,(अत्-मनिन् उणा.सू.४.१५२),अत्-to go constantly 1Pset
Self, Atma

अणु……अणु (N.)nom.sing.,(अण्-उन्) अण्-to sound 1P set
subtle
चेतसा……चेतस् (N.)instr.sing.,(चित्-असुन्) चित्-to understand 1P,10A set
through the mind
वेदितव्यः……(ad.) वेदितव्यः(M.)nom.sing., (विद्-तव्यत्) विद्-to know 2Pset
to be understood
यस्मिन्……(re.pro.) यद्(N.)loc.sing.
in which
प्राणः……प्राणः(M.)nom.sing., (प्र-अन्-अच् or घञ् ) अन्-to breath 2P
Prana
पञ्चधा.....indeclinable, (पञ्च-धाच्) संख्याया विधार्थे धा।५.३.४२
five forms
संविवेश……विश् 3rd per.sing.perfect. लिट्, विश्- to enter 6P set
enters
प्राणैः……प्राणः (M.)instr.pl.
with all sensory organs
चित्तम्……चित्तम् (N.)nom.sing., (चित्-क्त)
mind
सर्वम्……(demo.pro.) सर्वम्(N.)nom.sing.
all
ओतम्……(ad.) ओतम्(N.)nom.sing., (आ-वे-क्त) वे-to weave 1P anit
woven
प्रजानाम्……प्रजा (F.)gen.pl., (प्र-जन्-ड-टाप्)
of all creatures
विशुद्धे……(ad.) विशुद्धः (M.)loc.sing., (वि-शुध्-क्त) शुध्-to be pured 4P set
in the pure
विभवति……वि-भू 3rd.per.sing.pre.ten.लट्, वि-भू- to percieve 1P set
reveals

This Atma should be known by pure mind, in which body, Prana and the five forms of Prana like prana,apana etc. have entered. Consciousness is pervaded by the sensory organs and mind of all beings.This Atma reveals distinctly in purified mind which does not have any impurities.

**यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान् ।**
**तं तं लोकं जयते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चयेद् भूतिकामः ॥१०॥**

अन्वयः

विशुद्धसत्त्वः(निर्मलान्तःकरणः), यं यं लोकं(देवलोकादिलक्षणं), संविभाति(संकल्पयति), यां कामान्(भोगान्)च कामयते(प्रार्थयते), (विशुद्धसत्त्वः), तं तं लोकं जयते(प्राप्नोति), तां कामान् (प्राप्नोति)। तस्मात्, (आत्मज्ञस्य सत्यसंकल्पत्त्वात्), भूतिकामः(विभूतेः इच्छावान्पुरुषः), आत्मज्ञं हि अर्चयेत्(पूजयेत्, पादप्रक्षालनशुश्रुषानमस्कारादिभिः)।

यम्.....(re.pro.) यद् (M.)acc.sing.
which
लोकम्……लोकः (M.)acc.sing., (लोक्यते अनेन) (लोक्-घञ्), लोक्-to experience 4A set
world

मनसा.....मनस् (N.)instr.sing., (मन्-असुन्) मन्-to think 4A anit
through mind
संविभाति.....सं-वि-भा 3rd.per.sing.pre.ten.लट्, सं-वि-भा-to wish for 2P anit
wishes for
विशुद्धसत्त्वः.....(ad.) विशुद्धसत्त्वः (M.)nom.sing.,(विशुद्धः सत्त्वः यस्य सः- ष.ब.व्री.)
one whose mind is pure
कामयते.....कम् 3rd.per.sing.pre.sing.लट्, कम्-to desire 1A set कमेः णिङ्।३.१.३०
he/she desires
यान्.....(re.pro.) यद्(M.)acc.pl.
which
कामान्.....कामः (M.)acc.pl. (कम्-घञ्)
objects of desire
तम्.....(re.pro.) तद् (M.)acc.sing.
that
जयते.....छान्दसम्-जयति जि 3rd.per.sing.pre.ten.लट्, जि-to conquer 1P anit
gains
तान्.....(re.pro.) तद् (M.)acc.pl.
those
तस्मात्.....(demo.pro.) तद् (M.)abl.sing (हेतो पञ्चमी)
because of that reason
आत्मज्ञम्.....(ad.) आत्मज्ञः (M.)acc.sing.,(आत्मानम् जानाति- उप.तत्पु.)
to one who knows Atma
हि.....indeclinable
indeed
अर्चयेत्.....अर्च् 3rd.per.sing.pot.mood.विधि-लिङ्ग, अर्च्- to worship 1P, 10U set
one should worship, adore
भूतिकामः.....(ad.) भूतिकामः (M.)nom.sing., (भूतिं विभूतिं कामयते- )
desirous of prosperity

A person whose mind is pure, desires whatever worlds, characterized by the Devloka etc. and wishes for any object of enjoyment, he/she obtains all those.Therefore one who is desirious of prosperity should worship the knower of Self through prostration,service,washing of feet etc.,beacuse the nature of the knower of Self is infallible.

******

इति मुण्डकोपनिषदि तृतीयमुण्डके प्रथमः खण्डः

******

**स वेदैतत्परमं ब्रह्म धाम यत्र विश्वं निहितं भाति शुभ्रम्।**
**उपासते पुरुषं ये ह्यकामास्ते शुक्रमेतदतिवर्तन्ति धीराः ॥१॥**

अन्वयः

सः(ब्रह्मज्ञः), एतद् परमं(उत्कृष्टं) धाम(सर्वकामनामास्पदं), ब्रह्म(यथोक्तं लक्षणं), वेद(जानाति), यत्र(यस्मिन्धाम्निब्रह्मणि), विश्वं(समस्तं जगत्), निहितं(अर्पितं, ओतं), (यच्च), शुभ्रं(शुद्धं ब्रह्म), भाति(स्वेन ज्योतिषा प्रकाशते)। ये अकामाः(मुमुक्षवः-विभूतितृष्णावर्जिताः), हि, पुरुषं(यथोक्तब्रह्मज्ञं), उपासते(सेवन्ते), ते धीराः(मुमुक्षवः), एतत् शुक्रं(शरीरोत्पत्तिकारणं), अतिवर्तन्ति(गच्छन्ति)।

सः.....(re. pro.) तत् (M.)nom.sing.
he
वेद.....विद् 3rd.per.sing.pre.ten.लट्, विद्- to know 2P set विदः लटो वा।३.४.८३
he/she knows
एतद्.....(demo.pro.) एतत् (N.)acc.sing.
this
परमम्.....(ad.) परमम्(N.) acc.sing., (परं परत्वं माति-क तारा.)
exalted
ब्रह्म.....ब्रह्म (N.) acc.sing.
Brahman
धाम.....धामन् (N.) acc.sing., (धा-मनिन् ) धा-to sustain 3P anit
treasure, abode
यत्र.....indeclinable
in which
विश्वम्.....(ad.) विश्वम् (N.)nom.sing., (विश्-व) विश्- to enter 6P
the universe
निहितम्.....(ad) निहितम्(N.)nom.sing..,(नि-धा-क्त) दधातेः हिः।७.४.४२ धा- to bear 3P anit
resided
भाति.....भा 3rd.per.sing.pre.ten.लट्, भा-to appear, shine 2P anit
it shines
शुभ्रम्.....(ad.) शुभ्रम् (N.)nom.sing., (शुभ्-रक्) शुभ्- to shine 1Pset, 1Aset, 6Pset
pure
उपासते.....उप-आस् 3rd.per.pl.pre.ten.लट्, उप-आस्-to worship 2A set
they worship
पुरुषम्.....पुरुषः (M.)acc.sing.
human being
ये.....(re.pro.) यद्(M.)nom.pl.
which
अकामाः.....(ad.) अकामः (M.)nom.pl., (कामाः न विद्यते यस्य सः-नञ् ब.व्री.)
one who does not have any desires
ते.....(re.pro.) तद्(M.)nom.pl.
those
शुक्रम्.....शुक्रः (N.)acc.sing., (शुच्-रक्, नि. कुत्वम्) शुच्-to grieve 1P set
the seed
अतिवर्तन्ति.....अति-वृत् 3rd.per.pl.pre.ten.लट्,अति-वृत्- to overcome,exceed 1A
they trascend
धीराः.....धीरः(M.)nom.sing.,(धी-रा-क)
wise men

He, the knower of Brahman knows Brahman, as the exalted abode of all desires; in which the whole universe is woven, and which shines with 'Its' own self illumining power. Those who are freed from desires and seekers of Moksa worship the knower of Brahman, (by doing so), those wise men transcend this seed of birth of the body. (No rebirth for them.)

**कामान्यः कामयते मन्यमानः स कामभिर्जायते तत्र तत्र ।**
**पर्याप्तकामस्य कृतात्मनस्त्विहैव सर्वे प्रविलीयन्ति कामाः॥२॥**

अन्वयः

यः(पुरुषः), कामान्(दृष्टादृष्टेष्टविषयान्), कामयते(प्रार्थयते), सः मन्यमानः(उक्तगुणान् चिन्तयमानः सन्), कामभिः(कामैः, धर्मा-धर्मप्रवृत्तिहेतुभिः, विषयेच्छारूपैः सह), जायते, तत्र तत्र(यत्र, कामाः, विषयप्राप्तिनिमित्तं पुरुषं, कर्मसु नियोजयन्ति, तत्र एव तेषु तेषु विषयेषु तैः कामैः वेष्टितः सन् जायते)। (यः)तु, पर्याप्तकामस्य(आत्मकामत्वेन परिसमन्ततः आप्ताः कामाः यस्य तस्य), कृतात्मनः(विद्यया स्वेन रूपेण कृतः आत्मा मनः येन), इह एव(तिष्ठति एव शरीरे), सर्वे कामाः प्रविलीयन्ति(नश्यन्ति)।

कामान्.....कामः (M.)acc.pl., (कम्-घञ्)
objects of desire
यः.....(re.pro.) यद् (M.)nom.sing.
which
कामयते.....कम् 3rd.per.sing.pre.sing.लट्, कम्-to desire 1A set कमेः णिङ्।३.१.३०
he/she desires
मन्यमानः.....(ad.) मन्यमानः 9M.)nom.sing., (मन्-शानच्) मन्-to think,consider 4A anit
one who covets
सः.....(re.pro.) तद् (M.)nom.sing.
he
कामभिः.....छान्दसम्- कामैः कामः(M.)instr.pl.
with the desires
जायते.....जन् 3rd.per.sing.pre.ten.लट्, जन्- to be born 4A set ज्ञाजनोर्जा।७.३.७९
is born
तत्र.....indeclinable
in that
पर्याप्तकामस्य.....(ad.) पर्याप्तकामः (M.)gen.sing., (परितः आप्ताः कामाः येन- तृ.ब.व्री.)
desires are fulfilled by whom
कृतात्मनः.....(ad.) कृतात्मन् (M.)gen.sing.,(विद्यया कृतः मनः, आत्मा येन -तृ.ब.व्री.)
by whom mind composed of knowledge, self poised
तु.....indeclinable
on the contrary, but, where as
इह.....indeclinable
here
सर्वे.....(demo.pro.) सर्व (M.)nom.pl.
all
प्रविलीयन्ति.....प्र-वि-ली 3rd.per.pl.pre.ten.लट्,प-वि-ली-to vanish 10U anit
vanish
कामाः.....कामः (M.)nom.pl.,(कम् -घञ्)
desires

One who asks for desirable objects which are seen and not seen, he is born while thinking on those things along with desires which lead to activity in the form of Papa and Punya. Where desires impell the person in activities for acquiring the objects, he is born admist those very objects being surrounded by those desires. But whose desires are totally fulfilled by whom, mind is composed in ones own self in the form of knowledge, for that person, while living here in the body all desires get dissipated. (No rebirth for them.)

**नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।**
**यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्॥३॥**

अन्वयः

अयं आत्मा(यस्य लाभः परः पुरुषार्थः), प्रवचनेन(वेदशास्त्राध्ययनबाहुल्येन) न लभ्यः, न मेधया(ग्रन्थार्थधारणशक्त्या लभ्यः), न बहुना श्रुतेन(भूयसा शास्त्रश्रवणेन न लभ्यः)। (तर्हि केन लभ्यः), एषः(मुमुक्षुः), यं(परमात्मनं), वृणुते(प्राप्तुं इच्छति), तेन(वरणेन आत्मा) लभ्यः।एषः आत्मा, तस्य(मुमुक्षोः), एव, स्वां तनुं (स्वात्वतत्वं स्वरूपं), विवृणते(प्रकाशयति)।

अयम्.....(demo.pro.) इदम् (M.)nom.sing.
this
आत्मा.....आत्मन् (M.)nom.sing., (अत्-मनिन् उणा.सू.४.१५२),अत्-to go constantly 1Pset
self
प्रवचनेन.....(ad.) प्रवचनम् (N.) instr.sing., (प्र-वच्-ल्युट्) वच्- to speak 2P anit
through study
लभ्यः.....(ad.) लभ्यः (M.)nom.sing., (लभ्-यत्) लभ्-to gain 1A anit
to be attained
मेधया.....मेधा (F.)instr.sing., (मेध्-अञ्-टाप्) मेध्- to meet 1U set
through retention (of memory)
बहुना.....(ad.) बहु (M.)instr.sing., (बह्-कु,नलोपः)
through much
श्रुतेन..... (ad.) श्रुतः (M.)instr.sing., (श्रृ-क्त) श्रृ-to hear 1P anit
through hearing
यम्.....(re.pro.) यद् (M.)acc.sing.
which
एषः.....(demo.pro.) एतद् (M.)nom.sing.
this
वृणुते.....वृ 3rd.per.sing. pre.ten.लट्, वृ-to choose 5U set
chooses, seeks to reach.
तेन.....(re.pro.) तद्(M.)instr.sing..
by that
तस्य.....(re.pro.) तद्(M.)gen.sing..
of that
विवृणुते.....वि-वृ 3rd.per.sing. pre.ten.लट्,वि- वृ- to reveal 5U set
reveals
तनुम्.....(ad.) तनु (F.)acc.sing.,(तन्-उ) तन्-to believe 10 U set
nature
स्वाम्.....(pro. ad.) स्वा(F.)acc.sing.,(स्वन्-ड) स्वन्- to adore 1Pset
ones own

This Atma, whose attainment is the highest goal, is not attained by extensive study of scriptures, is not attained through the power of retention of the meaning of the scriptures and also is not attained by much (Sravanam) hearing. Then how can it can be attained? One who is desirous of Moksha chooses to understand this Paramatma. By choosing that Atma alone, Atma is attainable.This Atma, for that person reveals its own nature.

**नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाप्यलिङ्गात् ।**

**एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधाम ॥४॥**

अन्वयः

अयमात्मा बलहीनेन(आत्मनिष्ठाजनितवीर्यहीनेन), न लभ्यः, प्रमादात्(लौकिकविषयसङ्गनिमित्तप्रमादात् न लभ्यः), (तपसः=ज्ञानम्, लिङ्गः=संन्यासः), तपसः(ज्ञानात्)वा अपि अलिङ्गात्(संन्यासरहितात् न लभ्यः)। यः तु विद्वान्(विवेकी), एतैः उपायैः (बल-अप्रमाद-संन्यास-ज्ञानैः), यतते, आत्मा तस्य(विदुषः), ब्रह्मधाम विशते(संप्रविशति)।

अयम्.....(demo.pro.) इदम् (M.)nom.sing.
this
आत्मा.....आत्मन् (M.)nom.sing.
Self
बलहीनेन.....(ad.) बलहीनः (M.)alb.sing., (बलात् हीनः- पं.तत्पु.)
bereft of strenth
लभ्यः.....(ad.) लभ्यः (M.)nom.sing.
to be attained
प्रमादात्.....प्रमादः (M.)abl.sing.,(प्र-मद्-घञ्) मद्-to be drunk 4P set
negligence
तपसः.....तपस् (N.)abl.sing.
by austerity
वा.....indeclinable
or
अपि.....indeclinable
even though
अलिङ्गात्.....(ad.) अलिङ्गः (M.)abl.sing., (न लिङ्गः -नञ् तत्पु.)
not by any characteristic(lingam),insignia
एतैः.....(demo.pro.) एतत् (N.)instr.pl.
by these
उपायैः.....उपायः (M.)instr.pl., (उप-इ-घञ्) इ-to go 2P anit
by means
यः.....(re.pro.) यद्(M.)nom.sing.
who
विद्वान्.....विद्वस्(M.)nom.sing., (विद्-क्वसु) विद् -to know 2P set
knower
तस्य.....(re.pro.) तद्(M.)gen.sing..
of that
विशते.....छान्दसम्.-विशति विश् 3rd.per.sing.pre.ten.लट्,विश्- to enter 6P anit
enters
ब्रह्मधाम.....(ad.) ब्रह्मधाम (N.) acc.sing., (ब्रह्म एव धाम- क.धा.)
abode; that is Brahman.

This Atma is not attainable by the weak person, which is born in the person who does not have strength of committetment to Atma, nor by negligence which is caused due to attachment towards objects of worlds. Here meaning of Tapas is knowledge and linga is sign of renouncing, therefore knowledge which is not associated with Sanyasa, for such a person too, Atma is not attainable. But the wise man strives by these means with vigour, without negligence, renouncing life style and for that person Atma (as though) enters into the abode of Brahman through knowledge.

**संप्राप्यैनमृषयो ज्ञानतृप्ताः कृतात्मनः वीतरागाः प्रशान्ताः ।**
**ते सर्वगं सर्वतः प्राप्य धीरा युक्तात्मानः सर्वमेवाविशन्ति ॥५॥**

अन्वयः

एनम्(प्रकृतं आत्मानं), संप्राप्य(अधिगम्य), ऋषयः(द्रष्टारः), ज्ञानतृप्ताः(सम्यग्ज्ञानेन तुष्टाः), कृतात्मनः(परमात्मस्वरूपेण निष्पन्नः कृतः आत्मा येषां), वीतरागाः(विगताः रागाः यस्मात्), प्रशान्ताः(उपरतेन्द्रियाः भवन्ति)। ते धीराः(अत्यन्तविवेकिनः), सर्वगं (आकाशवत्), सर्वतः(सर्वत्र आत्मानं), प्राप्य(ज्ञात्वा), युक्तात्मानः(नित्यसमाहितः सन्तः), सर्वं एव, (शरीरपातकाले), आविशन्ति (अविद्याकृत-उपाधिपरिच्छेदं जहति)।

संप्राप्य.....ind.past.part., (सम्-प्र-आप्-ल्यप्)
having attained
एनम्.....(demo.pro.) एतत् (M.)acc.sing. second form of एतम्
to this
ऋषयः.....ऋषिः (M.)nom.pl., (ऋष्-इन्, कित्) (ऋषन्ति जानन्ति-इति), ऋष्-to go 6P set
seers of vedic hymns
ज्ञानतृप्ताः.....(ad.) ज्ञानतृप्तः (M.)nom.pl., (ज्ञानेन तृप्तः-तृ.तत्पु.)
contended with knowledge
कृतात्मनः..... (ad.) कृतात्मन् (M.)nom.pl., (कृतः आत्मा येषां ते-ष.ब.व्री.)
those whose Atma is understood
वीतरागाः..... (ad.) वीतरागाः (M.)nom.pl.,(विगताः रागाः यस्मात्-प्रादि.ब.व्री.)
free from all attachments
प्रशान्ताः.....(ad.) प्रशान्तः (M.)nom.pl., (प्र-शम्-क्त) (प्रकर्षेण शान्तः)
self composed
ते.....(re.pro.) तद्(M.)nom.pl.
those
सर्वगम्.....(ad.) सर्वगः (M.)acc,sing., (सर्वम् गच्छति -उपपद तत्पु.)
one who is present everywhere
सर्वतः.....indeclinable, (सर्व-तसि)
all pervasive
प्राप्य..... indecl.past.part., (प्र-आप्-ल्यप्)
having attained, understood
धीराः.....धीरः(M.)nom.sing., (धी-रा-क)
wise men
युक्तात्मानः.....(ad.) युक्तात्मान् (M.)nom.pl., (युक्तः आत्मा येषां ते- ष.ब.व्री.)
those whose are composed within themselves
सर्वम्.....(demp.pro.) सर्व (M.)acc.sing.
all
आविशन्ति.....आ-विश् 3rd.per.pl.pre.ten.लट्, आ-विश्- to enter 6P anit
they enter

Having properly understood Atma, the seers are contented with knowledge, identified with paramatma, are free from all attachments, sense-organs are withdrawn. Those highly discriminative people, having known Atma as all pervasive and pervading everywhere like space, being self contented; at the time of the falling of the body(death), they enter into All. (They give up the limitation name and form existing in the

'time and space-world' which are adjuncts of ignorance.)

**वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः ।**
**ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे ॥६॥**

अन्वयः

वेदान्तविज्ञानसुनिश्चितार्थाः(वेदान्तजनितं विज्ञानं, तस्य अर्थः परमात्मा विज्ञेयः, सः परमात्माविज्ञेयार्थः सुनिश्चितः येषां ते), संन्यासयोगात्(सर्वकर्मपरित्यागलक्षणयोगात्, ब्रह्मनिष्ठास्वरूपात् एव), यतयः(यतनशीलाः), शुद्धसत्वाः(शुद्धं सत्वं चित्तं येषां,) (भवन्ति)। ते(उक्तलक्षणयतयः), परान्तकाले(संसारिणां मरणकालाः अपरान्तकालः, किन्तु, मुमुक्षूणां देहत्यागकालः परान्तकालः), ब्रह्मलोकेषु(साधकानां अनेकत्वात् बहुवचनं प्रयोगः, ब्रह्म एव लोकः, तस्मिन् ब्रह्मणि), सर्वे परामृताः(जीवन्तः एव ब्रह्मात्मभूताः), परिमुच्यन्ति(परिसमन्तात्, घटाकाशवत् निवृत्तिं उपयान्ति)।

वेदान्तविज्ञानसुनिश्चितार्थाः..(ad.) वेदान्तविज्ञानसुनिश्चितार्थः (M.)nom.pl. (वेदान्तजनित विशेषज्ञानं- वेदान्तविज्ञानम्, वेदान्तविज्ञानस्य अर्थः-परमात्मा विज्ञेयः, परमात्मविज्ञेयार्थः सुनिश्चितः येषां ते -)
who have ascertained the meaning of the knowledge born by the study of vedanta
संन्यासयोगात्.....(ad.) संन्यासयोगः (M.)abl.sing.,(संन्यासः एव योगः- क.धा.)
because of the life style of sannyasa
यतयः.....यतिः (M.)nom.pl., (यम्-क्तिन् )
sannyasins
शुद्धसत्वाः.....(ad.) शुद्धसत्वः (M.)nom.pl., (शुद्धं सत्वं मनस् येषां ते - ष.ब.व्री.)
one whose mind is pure
ते.....(re.pro.) तद् (M.)nom.pl.
those
ब्रह्मलोकेषु.....(ad.) ब्रह्मलोकः (M.)loc.pl.,(ब्रह्म एव लोकः- क.धा.)
abode, that is Brahman.
परान्तकाले.....(ad.) परान्तकालः (M.)loc.sing., (परान्तस्य देहावसानस्य कालः- ष.तत्पु.)
at the final departure time(of the body)
परामृताः.....(ad.) परामृतः (M.)nom.pl., (परं सर्वोत्कृष्टं अमृतं ब्रह्मात्मभूतं येषां ते-)
who identifies oneself in the form of Brahman, which is the most exalted, deathless
परिमुच्यन्ति.....परि-मुच् 3rd.per.pl.pre.ten.लट्, परि-मुच्-to be freed 4P set
freed
सर्वे..... (demp.pro.) सर्व (M.)non.pl.
all

Knowledge is born because of the study of Vedanta, the meaning of the knowledge is Paramatma should be understood, the one has totally assimilated that meaning, they are theYatis, who strive and their mind is pure because of their life style of Sannyasa, which is of the nature of commitment to Brahman and charecterized by giving up all activities. Those Sannyasins, even while living, identify themselves with Brahman. They are free and at the time of final departure , (as though) enter in the abode of Brahman like pot-space. For worldly people, the time of death is not final but for knowledgeable people this is final.

**गताः कलाः पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु ।**
**कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ति॥७॥**

अन्वयः

(मोक्षकाले), पञ्चदश कलाः(प्राणाद्याः), प्रतिष्ठा(प्रतिष्ठां, स्वं स्वं कारणं), गताः(भवन्ति)। सर्वे देवाः(देहाश्रयाः चक्षुरादिकरणस्थाः), प्रतिदेवतासु(समष्टिदेवतासु गताः)। कर्माणि(प्रारब्धव्यतिरिक्तानि, प्रारब्धस्य भोगादेव क्षयात्), विज्ञानमयः च(विज्ञानप्रायः, कर्ता), आत्मा, सर्वे परे, अव्यये(अनन्ते), एकीभवन्ति(एकत्वं आपद्यन्ते, घटादि अपनये इव आकाशे घटाद्याकाशाः)।

गताः.....(ad.) गता (F.)nom.pl., (गम्-क्त) गम्- to go 1P anit
goes to

कलाः.....कला (F.)nom.pl., (कल्-कच्-टाप्) कल्-to go1A,10U set
constituents

पञ्चदश.....(ad.) पञ्चदशन् nom.pl.
fifteen

प्रतिष्ठाः.....(ad.) प्रतिष्ठा (F.)acc.pl., (प्रति-स्था-अङ्-टाप्)
resting,remaining.

देवाः.....देवः (M.)nom.pl., (दिव्-अच्) दिव्-to shine 4P set
Devatas

सर्वे..... (demp.pro.) सर्व (M.)non.pl.
all

प्रतिदेवतासु.....(ad.) प्रतिदेवता (F.)loc.pl., (देवता देवता प्रति- )
respective devatas

कर्माणि.....कर्म (N.)nom.pl., (कृ-मनिन्)
all karmas

विज्ञानमयः..... (ad.) विज्ञानमयः(M.)nom.sing., (विज्ञान-मयट्)
available in the intellect

आत्मा.....आत्मन् (M.)nom.sing.
Self

परे.....(ad.) परम्(N.)loc.sing.
exalted

अव्यये.....(ad.) अव्ययम् (N.)loc.sing.
in which does not undergo any decay

एकीभवन्ति.....एकी-भू 3rd.per.pl.pre.ten.लट्, (एक-च्वी-भू)
becomes one

At the time of Moksa, the fifteen constituents like Prana etc., enter into their corresponding Devatas. All Devas who are located in the organs like eye etc., they merge with the Total devatas(Samashti); like Devata of the eye goes back to the Sun. All Karmas will falsify, except Prarabdha Karma, is exhausted by experience. The ego is available in the intellect. These(fifteen constituents) are unified, exalted and limitless. (Like space of pot is unified with space when pot is broken.)

**यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।**
**तथा विद्वान्नामरूपादिमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥८॥**

अन्वयः

(मोक्षकाले), यथा स्यन्दमानाः नद्यः(गङ्गाद्याः), नामरूपे विहाय(त्यक्त्वा), अस्तं गच्छन्ति(अविशेषात्मभावं प्राप्नुवन्ति)। तथा, विद्वान् नामरूपादिमुक्तः(अविद्याकृतोपाधेः मुक्तः सन्), परात्(अव्याकृतात् मायायाः)परं, दिव्यं(स्वयं ज्योतिस्वरूपं), पुरुषं उपैति (उपगच्छति)।

यथा.....indeclinable, (यत्-थाल्)
just as
नद्यः.....नदी (F.)nom.pl., (नद-ङीप्)
rivers
स्यन्दमानाः.....(ad.) स्यन्दमाना (F.)nom.pl., (स्यन्द्-शानच्) स्यन्द्-to flow out 1A vet
flowing
समुद्रे.....समुद्रः (M.)loc.sing., (सम्-उद्-रा-क)
in the ocean
अस्तम्.....(ad.) अस्तम् (N.)acc.sing., (अस्-क्त) अस्-to be 2P set
invisible
गच्छन्ति.....गम् 3rd.per.pl.pre.ten.लट्, गम्-to go 1P anit
they go
नामरूपे.....(ad.) नामरूपम् (N.)acc.dual, (नाम च रूपं च - इत.द्व.)
names and forms
विहाय.....ind.past participle., (वि-हा-ल्यप्) हा-to give up 3P anit
having given up
तथा.....indeclinable, (तत्-थाल्)
so to
विद्वान्.....विद्वस् (M.)nom.sing.,(विद्-क्वसु) विद् -to know 2P set
knower
नामरूपात्.....(ad.) नामरूपम् (N.)abl.sing.
from name and form
विमुक्तः.....(ad.) विमुक्तः (M.)nom.sing., (वि-मुच्-क्त) मुच्- to release 4P anit
freed
परात्.....(ad.) परम् (N.)abl.sing.
from exalted
परम्.....(ad.) परम् (N.)acc.sing.
exalted
पुरुषम्.....पुरुषः (M.) acc.sing.
human being
उपैति.....उप-इ 3rd.per.sing.pre.ten.लट्, उप-इ- to attain 2P set
one attains
दिव्यम्.....(ad.) दिव्यः(M.)nom.sing., (दिव्-यत्) दिव्- to shine 4P anit
resplendent

Just as rivers which are flowing merge into the ocean, without any special identity, give up their name and form. So too, at the time of Moksa, the illumined person being free from name and form, idenitify with Self effulgent Purusa, which is more exalted than the unmanifest Maya.

**स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति।तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति ॥९॥**

अन्वयः

यः(कोऽपि मुमुक्षुः), तत्परमं ब्रह्म, वेद(साक्षादहमेवास्मीति जानाति), सः ब्रह्म एव भवति(देवैः अपि तस्य ब्रह्मप्राप्तिं प्रति विघ्नः

कर्तुं न शक्यते)। अस्य(ज्ञानिनः), कुले, अब्रह्मवित्(ब्रह्मज्ञानरहितः), न भवति। (सः), शोकं(मानससंन्तापं), तरति(जीवन्नेव अतिक्रामति), पाप्मानं(धर्माधर्माख्यं), तरति (अतिक्रामति), गुहाग्रन्थिभ्यः(अविद्याग्रन्थिभ्यः), विमुक्तः(सन्), अमृतः भवति।

सः.....(re.pro.) तद् (M.)nom.sing.
who
यः.....(re.pro.) यद् (M.)nom.sing.
who
ह,वै.....indeclinable
indeed
तत्.....(demo.pro.) तद् (N.)acc.sing.
that
परमम्.....(ad.) परमम् (N.)acc.sing.
exalted
ब्रह्म.....ब्रह्मन् (N.)acc.sing.
Brahman
वेद.....विद् 3rd.per.sing.pre.ten.लट्, विद्- to know 2P set
knows
भवति.....भू 3rd.per.sing.pre.ten.लट्, भू- to become 1P set
becomes
अस्य.....(demo.pro.) इदम् (M.)gen.sing.
of this
अब्रह्मवित्.....(ad.) अब्रह्मवित् (M.)nom.sing., (न ब्रह्मवित्- नञ् तत्पु.)
one who does not know Brahman
कुले.....कुलम् (N.)loc.sing., (कुल-क)
in the lineage
तरति.....तॄ 3rd.per.sing.pre.ten.लट्, तॄ-to cross over 1P set
crosses over, overcomes
पाप्मानम्.....पाप्मन् (M.)acc.sing.,(पा-मानिन्- पुगागमः) पा-to absorb 1P anit
wrong action
गुहाग्रन्थिभ्यः.....(ad.) गुहाग्रन्थिः (F.)abl.pl. , (गुहायां ग्रन्थिः, स.तत्पु.), (गुह्- टाप्),(ग्रन्थ्-इन्)
from the knots of the heart
विमुक्तः.....(ad.) विमुक्तः(M.)nom.sing.
is freed

One who knows that; "Brahman is not other than me", he/she indeed is Brhaman. Even Devatas are not able to create any obstacle for his/her understanding of Brahman. In his lineage, no one will be away from knwoledge of Brahman. While living only, he/she overcomes mentle afflictions, rises above Punya and Papa, being freed from knot of ignorance attains immortality.

**तदेतदृचाभ्युक्तम्** -

**क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः स्वयं जुह्वत एकर्षिं श्रद्धयन्तः ।**
**तेषामेवैषां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम् ॥१०॥**

अन्वयः

तत्, एतद्, (ब्रह्मविद्यासम्प्रदानविधानं), ऋचा(मन्त्रेण), अभ्युक्तं(कथितं), क्रियावन्तः(यथोक्तकर्मानुष्ठानेन शुद्धचित्ताः), श्रोत्रियाः

(वेदार्थविदः), ब्रह्मनिष्ठाः(सगुणब्रह्मोपासकाः), श्रद्धयन्तः(श्रद्दधानाः सन्तः), स्वयं एकर्षिं(अकर्षिसंज्ञकं अग्निं), जुह्वते(जुह्वति)। तु यैः, विधिवत्(अथर्ववेदोक्त विधानेन), शिरोव्रतं(शिरस्याग्निधारणलक्षणं व्रतं), चीर्णं(कृतं), तेषां(पात्रभूतानां) एव, एषां ब्रह्मविद्यां वदेत(ब्रूयात्)।

क्रियावन्तः.....(ad.) क्रियावान् (M.)nom.pl., (क्रिया अस्य अस्ति इति- क्रिया-वतुप्)
those who do actions

श्रोत्रियाः.....(ad.) श्रोत्रियः (M.)nom.pl., (छन्दः वेदम् अधिते वेत्ति वा-छन्दस्-ध, श्रोत्रादेशः)
well versed in Vedas

ब्रह्मनिष्ठाः.....(ad.) ब्रह्मनिष्ठः (M.)nom.pl., (ब्रह्मणि निष्ठा यस्य सः-स.ब,व्री.)
who are absorbed in Brahman

स्वयम्.....indeclinable, (सु-अय्-अम्)
oneself

जुह्वते.....छान्दसम् जुह्वति 3rd.per.sing.pre.ten.लट्,हु- to offer,to sacrifice 3P anit
they perfom

एकर्षिम्.....एकर्षिः (M.)acc.sing.
name of the fire ritual

श्रद्धयन्तः.....छान्दसम् श्रद्दधान् (M.)nom.pl., (श्रत्-धा-शानच्), ('श्रत्' is a prefix which always with 'धा' root.)
those who have devotion

तेषाम्.....(demo.pro.) तद् (M.)gen.pl.
of those

एताम्..... (demo.pro.) एतद् (F.)acc.sing.
this

ब्रह्मविद्याम्.....(ad.) ब्रह्मविद्या (F.) acc.sing., (ब्रह्मणः विद्या-ष.ब.व्री.)
knowledge of Brahman

वदेत.....छान्दसम्-वदेत् वद् 3rd.per.sing.pot.mood.विधि-लिङ्ग, वद्-to say, to speak 1P set
should tell

शिरोव्रतम्.....(ad.) शिरोव्रतः (M.)acc.sing., (शिरसि व्रतं अग्निधारणलक्षणम्- स.तपु.)
a vow, holding fire on the top of the head

विधिवत्.....(ad.) विधिवत् (N.)nom.sing., (विधिः अस्य अस्ति-वतुप्)
in accordance

यैः.....(re.pro.) यद्(M.)instr.sing.
by whom

चीर्णम्.....(ad.) चीर्णम् (N.)nom.sing., (चर्-नक्, पृषो.अत ईत्वम्)
is done, is accomplished

That methodolgy of teaching the knowledge of Brahman is revealed by this hymn. Those whose mind is pure because of proper committment towards Karma, well versed in the Vedas, meditators of Brahman with its qualities(Saguna Brahman), being devoted, and perform themselves the fire ritual by the name Ekarsi. A vow(Shirovrata) characterized by holding fire on the head has been accomplished by whom in accordance to the statements of AthrvaVeda. They are qualified, and to them only the knowledge of Brahman should be taught.

**तदेतत्सत्यमृषिरङ्गिराः पुरोवाच नैतदचीर्णव्रतोऽधीते। नमः परमऋषिभ्यो नमः परमऋषिभ्यः॥११॥**

अन्वयः

पुरा(पूर्वं), ऋषिः अङ्गिराः, तदेतद्(अक्षरं), सत्यं, (शौनकाय), उवाच(उक्तवान्), (एवं अन्योऽपि, विधिवदुपसन्नाय मुमुक्षवे

ब्रुयात्-इति भावः)। एतद्(ग्रन्थं), अचीर्णव्रतः(न चीर्णं शिरस्याग्निधारणलक्षणं येन सः पुरुषः), न अधीते(न पठति)। नमः परमऋषिभ्यः(परमं ब्रह्म साक्षात् द्रष्टवन्तः ये ब्रह्मादयः तेभ्यः भूयोऽपि नमः। (द्विरूक्तिः अत्यन्तादरार्था समाप्त्यर्था च)।

तत्.....(demo.pro.) तत् (N.)acc.sing.,
that

एतत्.....(demo.pro.) एतत् (N.)acc.sing.
this

सत्यम्.....(ad.) सत्यम् (N.)acc.sing., (सत्-यत् )
the Truth

ऋषिः.....ऋषिः (M.)nom.sing., (ऋष्-इन्, कित्) (ऋषन्ति जानन्ति-इति), ऋष्-to go 6P set
seers of vedic hymns

अङ्गिराः.....अङ्गिरस् (M.)nom.sing., (अङ्ग्-अस-इरुट्)
Angira

पुरा.....indeclinable, (पुरा--का)
in ancient times

उवाच..... ब्रु 3rd per.sing.per.past द्वित्व लिट्, ब्रु-to speak 2U set
told

एतद्..... (demo.pro.) एतद् (N.)acc.sing.
this

अचीर्णव्रतः.....(ad.) अचीर्णव्रतः(M.)nom.sing. (चीर्णव्रतं न विद्यते यस्मिन सः-स.ब.व्री.)
a person who doesn't accomplish the vow

अधीते.....अधि-इ 3rd.per.sing.pre.ten.लट्, अधि-इ- to study 2A set (नित्यं अधिपूर्वकं इङ्)
to study

In ancient time, a seer named Angira taught to Saunaka this truth, which never undergoes any change. In this manner, one should teach only to the one who is desirous of Moksa, who approaches the teacher in a proper manner. One who has not done the vow of holding fire on the head, is not fit for the study of this knowledge. Salutations to great seers starting from Brahmaji, again and again salutations to them. Repitition is used as an indication of gratitude and as a conclusion of Mundaka upanisad.

*** ***